Title पाणिनीयवादनक्षत्रमाला

Author अप्पय्य दीक्षित:

Extent ३१ पत्र Age

Subject व्याकरण

परिभाषाविवरणम्
पाणिनीयपाद नक्षत्रमालाख्यम्

१२५

३५ पत्राणि

१४५ परिभाषार्थविवरण

८४०



॥श्रीगणेशाय नमः॥ उद्घाट्ययोगकलयाहृदयाब्जकोशंधन्यैश्चिरादपियथारुचिगृह्यमाणः। यःप्रस्फुरत्यविरतंपरिपूर्णरूपःश्रेयः
१ समेदिशतुशाश्वतिकंमुकुंदः॥१॥ पूर्वैरितरतंत्रयुगेरचितानवसप्तसम्मितावादाः। अधुनापाणिनितंत्रेविदुषांतोषायरच्यंते॥ किंलुप्तोपधा
त्वचङ्परनिर्ह्रासकुत्वषूपसंख्यानमितिवार्तिकेअचोलुप्तंनस्थानिवदित्यर्थस्यक्वचिद्ग्रंथेषुनिषेधदर्शनात्क्वचिदंगीकारदर्शनाच्चवि
प्रतिपत्त्याविचारआरभ्यते॥ तत्रकेचिदाहुः अचोविधिंप्रतिनस्थानिवदित्येवाश्रीयतेनतुअचोलुप्तंनस्थानिवदिति॥ तथाहिअचोलुप्तंनस्था
निवदित्यर्थेआश्रयणेऽनुनातेर्णिजंतात्क्विपिलुट्वद्इतिस्थितेणिलोपात्पूर्वंअंतरंगत्वाद्वृद्धौटेःधावादेशयोःकृतयोःपश्चात्णिलोपेवलि
लोपात्पूर्वत्वाद्वृद्धिकर्तव्येअचोकृतस्यणिलोपस्यस्थानिवत्वनिषेधाद्वृद्धिसिद्धावपिलवमाचष्टेलवयतिलवयतेःक्विपिलव्इति
स्थितेणिलोपटिलोपयोःकृतयोःअचोकृतस्यणिलोपस्यस्थानिवत्वनिषेधेऽपिणौकृतस्यटिलोपस्यस्थानिवत्त्वादूठःप्राप्तौअचो
विधिंप्रतिनस्थानिवदित्यस्यार्थस्यावश्यमाश्रयणीयतयातेनैवलावयतेःलवमाचष्टेलौरित्युभयोरुपपादनसंभवेऽत्रार्थांतराश्र
यणस्यनिष्प्रयोजनत्वादेकस्मिन्वाक्येअर्थद्वयस्यासंभवाच्चअतएवभगवताभाष्यकारेणतद्वार्तिकव्याख्यानप्रस्तावेनपक्षांतरम १
त्रैनैवंविज्ञायतेअचोलुप्तंनस्थानिवदितिकिंतर्हिअचोविधिंप्रतिनस्थानिवदितिकृत्वाऊठ्वलोपयोःपक्षोवनिरस्तः॥ तस्माल्लवमाच

घेलावयतेर्वैरिस्येतद्रूपसिद्धिप्रयोजनकत्वाद्भाष्यकाराभिमतत्वाच्च क्वौ विधिं प्रति न स्थानिवदित्येवाश्रीयते न तु क्वौ लुप्तं न स्थानि
वदिति॥ इति प्रथमा कक्ष्या॥ अथ द्वितीया॥ यदि क्वौ लुप्तं न स्थानिवदिति नाश्रीयेत भाष्ये तदा यू स्त्र्याख्यौ नदी सूत्रे प्रथमलिंगग्रह
णप्रयोजनकथनपरे प्रयोजनं क्विलुक्समास इति वार्तिके क्विचं तोदाहरणं तेन कुमार्यै ब्राह्मण्यै इत्युदाहरणानुपपत्तिः॥ तथा हि कुमा
रीशब्दस्य ङीवंतस्याधातुत्वेन क्विलुप्त्वस्य संभवात् क्यजंतादुक्स निर्वर्त्या॥ अत एव तत्राख्यानप्रस्तावे कैयटेनापि कुमारीमिच्छ
त्यात्मनः कुमारीयति ततः कर्त्तरि क्विविति व्याख्यातं॥ तथा च कुमारीयव् इति स्थिते वेरपृक्तस्येति विलोपात्परत्वादतो लोपे कृते
लोपो व्योर्वलीति प्रथमविधेयतिर्देशसामर्थ्यात्परं प्रतिपदविधिमपि विलोपं बाधित्वा प्रथमं यलोपे पश्चाद्विलोपे च सति कुमारीशब्दः
क्विवंतः संपद्यते स च क्वौ लुप्तं न स्थानिवदित्यनाश्रयणे नोपपद्यते। अल्लोपस्य क्वौ कृतस्य स्थानिवद्भावात् विलोपात्परत्वादीकार
स्य यणि यलोपविधिं प्रति न पदांतेति स्थानिवत्त्वनिषेधे क्वौ वलि यलोपे च कुमार इति रूपांतरत्वप्रसंगात्॥ अत एव हरदत्तेनापि
ख्यात्यात्परस्येति सूत्रे सह खेन वर्तत इति सखः सखमिच्छति सखीयति सखीयतेः क्विप् सखीः सखुरित्युदाहृते सखीशब्दे अतो
लोपस्य स्थानिवत्त्वाबाधणादेशं वलि लोपं चाशंक्य क्वौ लुप्तं न स्थानिवदिति परिहृतं। भो भगो अघो अपूर्वस्येत्यत्रापि हृसंदृष्टी

तिदृस्यवश्चमाचष्टे दृक्षवयति दृक्षवयतेरप्रत्ययः। दृक्षवृ करोतीति इति काशिकायामुदाहृते दृक्षवृ शब्दे अश्राव्यप्रत्ययोयं विच्प्र
शिवः २ त्ययः क्विपि तु ग्रहीत्यादिसूत्रेण संप्रसारणं च स्यात् यो योवास्यादिति क्विप्रत्ययपक्षे दोषमुन्नाव्य स्थानिवत्त्वं तु रोरत्र क्वौ लुप्तत्वान्न विद्य
तइत्युक्तं तेनैव तस्मात्स्वयोजनवशात् क्वौ लुप्तं न स्थानिवदिति स्थाश्रयणीयं। यत्तु क्वौ लुप्तं न स्थानिवदित्येतस्मिन्वाक्यार्थद्वयालाभइति
तदपि न।। क्वौ विषये न स्थानिवदित्यर्थकल्पने नार्थद्वयस्यापि क्रोडीकारात्।। यत्तु भाष्यवाक्यं नैवं विज्ञायते क्वौ लुप्तं स्थानिवदितित
द्व्यनुपपत्त्या नैवमेव विज्ञायते क्वौ लुप्तं न स्थानिवदिति किं तर्हि विधिं प्रति न स्थानिवदित्यपीति यस्य द्वयांगीकारपरतया योजनमिति
।।इतिद्वितीया।। यदि क्वौ लुप्तं न स्थानिवदित्याश्रीयते तदा पठितुमिच्छति पिपठिषति पिपठिषतेः क्विपि पिपठीर्ब्राह्मणकुलं पिपठिषि ब्रा
ह्मणकुलानीतीष्यमाणं रूपं न स्यात् नपुंसकस्य झलचइति नुमि कृते क्वौ लुप्तस्यातो लोपस्य स्थानिवत्त्वनिषेधे झलन्तत्वान्नुमि
पिपठीषिइति रूपप्रसंगात्। तदनाश्रयणे न क्वौ विधिं प्रति न स्थानिवदित्यर्थाश्रयणे तु नुमः क्विनिमित्तत्वाभावेन स्थानिवत्त्वानिषे रामः २
धात्स्थानिवद्भावे अंगस्य झलन्तत्वाभावान्नुमभावः सिध्यति। अतएव दीधीवेवीटामिति सूत्रे अतोलोपस्य स्थानिवत्त्वाज्झ
लन्तत्वाभावान्नुमभावइत्युक्त्वा पिपठिषि ब्राह्मणकुलानीति रूपं साधयता कैयटेन क्वौ विधिं प्रति न स्थानिवदित्ययमर्थो व्यव

स्थायपिप्सतेनतु क्वौ लुप्तं न स्थानिवदितीति न परान्तसूत्रस्य भाष्ये व्याख्यातः॥ न च क्वौ लुप्तं न स्थानिवदित्यनाश्रयणेपि सूत्रा
ख्याविति भाष्ये कुमार्यै ब्राह्मणायेत्युदाहरणानुपपत्तिः॥ तत्र सर्वप्रातिपदिकेभ्य इत्सेक इति वार्तिकेन प्रातिपदिकग्रहणे लिं
गविशिष्टस्यापि ग्रहणात् कुमारीवाचरतीति क्विबंताद्धातोः कर्तरि क्विब्विधाने संभवेन स्थानिवत्त्वशंकाभावादेव तदुपपत्तेः॥
अत एव तत्र क्वबंताद्धातोः कर्तरि क्विबिति व्याख्यानानंतरं क्वौ लुप्तं न स्थानिवदित्यस्यार्थस्यातेनैव निराकृतत्वात्। स्थानिवत्त्वप्रसं
गस्वरसात्॥ अथवा कुमावाचरतीत्याचारक्विबंतात्कर्तरि क्विबिति पक्षांतरमुक्तं कैयटेन। यत्तु हरदत्तेन ख्यत्यात्परस्येत्यत्र
सख्युरित्युदाहरणे क्वौ लुप्तं नेति स्थानिवत्त्वं परिहृतं यच्च भोभगो इत्यत्र वृश्चवृशब्दस्य क्विबंतत्वे संप्रसारणप्रसंगमुक्त्वा स्था
निवत्त्वं तु णेरत्र क्वौ लुप्तत्वान्न विद्यत इत्युक्तं॥ तदुभयमपि न परान्तसूत्रे क्विलुगुपधात्वेति वार्तिकव्याख्यावसरे क्वौयद्धीते
तत्र कर्तव्ये यत्र कुत्रचित्कृतो जादेशो न स्थानिवदिति वार्तिकार्थमुक्त्वा तदुदाहरणानंतरं ये तु क्वौ लुप्तं न स्थानिवदिति पठंति ते
षामेतन्न स्यादित्यादिवाक्येन क्वौ लुप्तं न स्थानिवदित्याश्रयणेपि पटिषि ब्राह्मणकुलानीति रूपासिद्धिरेषां भावेन नत्तं पक्षं
निराकृत्य क्वौ विधिं प्रति न स्थानिवदिति पक्षस्यस्यैनैव समर्थितत्वात्। भाष्यकैयटविरुद्धं पिपठिषि ब्राह्मणकुलानीत्यत्रातिप्रसं

उक्तं स्तु लोंतरीयस्य व्याख्यानविरुद्धं पूर्वापरपर्यालोचनविधुरमित्यनादरणीयमेव ॥ खुतुसखीयतेः क्ति प्सखीः सख्युरितित
२ त्रकाशिकायामुदाहृतं तदप्यनुपदोक्तभाष्यादिविरोधादेव कौ लुप्तं न स्थानिवदिति नाश्रीयत इति अतोनुपपन्नमेव । तस्मात्कु
3 मार्यै ब्राह्मणायेति भाष्योदाहरणस्यान्वयोपपत्तेरुक्तत्वान्नेदं विज्ञायते कौ लुप्तं न स्थानिवदिति भाष्यस्यनैवमेवेत्यवधार
णं कस्मिन्नेन पक्षद्वयांगीकारपरतया योजनमयुक्तमिति ॥ इति तृतीया ॥ यदि कौ लुप्तं न स्थानिवदिति नाश्रीयेत तदा ख्य
त्यात्परस्येत्यत्र भाष्य एव विवृतं दृश प्रयोजनं तया सखीयतेरप्रत्ययः सख्युः पत्युः लून्सुपित्सदाहरणानुपपत्तिः । कथं चातो
लोपस्य स्थानिवत्त्वेन विलोपात्परत्वाद्युणे वलि लोपप्रसंगात् । अत एव तत्र कैयटेनापि खेयुस इत्युदाहरणे अत्र चोदयती
त्यादिग्रन्थेन स्थानिवद्भावाद्यणादेशं वलि लोपं चाशंक्य कौ लुप्तं न स्थानिवदित्येव समाहितं । अतस्तदन्यथानुपपत्त्यानेवं
विज्ञायत इति भाष्यं कथं चित्पक्षद्वयांगीकारपरतयावश्यं योजनीयमतस्तद्विरोधादेव दीधीवेवीटामिति सूत्रे कौ लुप्तं न स्था शिवः
निवदिति पक्षस्य निराकरणेन पियहि षि ब्रास्मणकुलानीति दूषणसमर्थनं कैयटेन कृतं न पदांतसूत्रे हरदत्तकृतं च ख्य ३
त्यात्परस्यत्र हरदत्तोक्तं ॥ इति चतुर्थी ॥ ख्यत्यात्परस्येत्यत्र भाष्ये सखीयतेरप्रत्ययः सख्युः पत्युरित्याद्युदाहरणान्यथानुप

यस्या चौलुकृतं नस्थानिवदित्यस्यार्थस्य कल्पनं तत्त्वान्यथोपपन्नं तथाहि सखशब्दात्सुपन्न्रा त्मनः क्यचि सुबंतात्स्व कर्मणो द्वि ४
तीयांतात्सनाद्यंता इति धातुसंज्ञायां सुपो धातुरिति सुप्लुकि सख्यि चेतीत्वे ततः कर्तरि क्विप् अल्लोपे यलोपे च विलोपात्सखा स
स्लोपस्य स्थानिवत्वात्तस्य यणो यलोपस्य च सुबंतस्य यरसंज्ञाया अंगकार्यत्वाभावान्न त्वनुमतेरप्रतिषेधात्सुप्तिङं तं पदमि
ति अंतर्वर्तिविभक्तिमपेक्ष्य पदसंज्ञायां कानि संति यानि संतीतिवन्न पदांतेति स्थानिवत्वनिषेधादेवानिष्टानि संभवात् ॥ न च वाच्य
तिस्सत्यपि तितपस्यती स्यादाविव नः क्यइति नियमात्पदसंज्ञानस्यात्तत इति वाच्यं । नांततुल्यसजातीयहल्त्वं तस्य नियमेन पदसंज्ञानि
वृत्त्यभ्युपगमात् तस्मात्सख्युरित्युदाहरणेनुपपत्त्यभावान्न पदांतसूत्रेनैवं विज्ञायत इति भाष्यं किंच्छगतायां पस्पृद्धयां गीकार
परतया न योजनीयमिति स्थितं ॥ भाष्यविरोधादेव सख्युरित्युदाहरणे चौलुक्तं नस्थानिवदित्याश्रित्य समाधानं कैयटकृतम
नुपपन्नं । दीधीवेवीटामित्यत्र स्वयं व्यवस्थापितार्थविरोधाच्च । पूर्वापरपर्यालोचनराहित्यस्य सुगमत्वात् अतो न तदन्यथानु
पपत्त्यादिकल्पनमिति अवश्यं चेत्साद्यंशे अंतर्वर्तिविभक्त्यपेक्षः पदांतविषयेन पदांतेति निषेधोंगीकार्यः । अन्यथा चौलुकृतं
नस्थानिवदित्याश्रयणेपि अमुमुइचेत्यादौ अचइसंचतेरल्लोपस्य स्थानिवत्वाद्यथा स्यादिति ॥ इति पंचमीकक्ष्या ॥ भवेदेवं हल्ना

द्वौ अजादौ तु आकडारादेकेति नियमस्य मानावधिकायायचि भमिति भसंज्ञया पदसंज्ञाया निवर्तितत्वाद्यणः पदांतत्वेन विधाना
४ भावान्न पदांतेति स्थानिवत्वनिषेधो न प्राप्नोति· न च खाद्युत्पत्त्यनंतरम जादौ सखि अ सि सत्र सत्यपि स्थानिवत्वे यण एव प्राप्तिः
५ सा चैवैवं न तु वलिलोपस्य खाद्युत्पत्तेः पूर्वमेव परत्वान्नित्यत्वादंतरंगत्वाच्च वलिलोपस्य कृतत्वादन्यथा तुल्यावधिकत्वाभावाद्भसं
ज्ञया न पदत्वनिवृत्तिरिति वाच्यं॥ वोश्वाः च्योर्वलीति अर्धमात्राधिकप्रथमविधेयनिर्देशसामर्थ्यादस्यासत्योत्तरसूत्रप्रतिपन्ने
विप्रत्यय्येव वलिलोपस्यावश्यकत्वसूचनेन कांड्यते· क्विपि परत्वप्राप्तमतो लोपं बाधित्वांतरंगत्वाद्वलिलोपे कृते वर्णाश्रयस्यापि
यल्लोपस्य प्रत्ययलक्षणेन प्रवृत्तिवदिहापि प्रत्ययलक्षणेन यल्लोपप्रसंगात्। न च प्रत्ययलक्षणेन वलिलोपात्सुपगमे क्वौ नुमं
न स्थानिवदिति वाच्यं तो लोपस्य स्थानिवत्वनिषेधान्निमित्तस्य यणोभावेपि स खलु डस्स कृतस्य यस्य लोपप्रसंग इति वाच्यं अत्र त
भूतत्विक्विवपेक्षेंतरंगे वैवलिलोपप्रसंगादिति· अतोदौ कपचातो लोपस्य स्थानिवत्वनिषेधार्थं तदुदाहरणान्यथानुपपत्त्या क्वौ लुप्तं
न स्थानिदिस्विवरपं कल्पनीयं इति॥ इति षष्ठी॥ यजादौ पूर्वमिति संज्ञायामत्रोयस्य स्थानिवद्भावादिग्लावधिकया भसंज्ञया पद शिवः
संज्ञाया बाधनाभावात्पदांतत्वेन यणो विधानं प्रति न पदांतेति स्थानिवद्भावनिषेधादेव तदुदाहरणोपपत्तौ नत्वदुक्तकल्पनापेक्षे ४

ति॥इति सप्तमी॥यचि भे तसौ मत्वर्थ इत्यत्र पदसंज्ञामनुवर्त्य परं सज्ञ संज्ञं भवतीति भसंज्ञाया अपि जस्त्वादिवत्पदकार्यत्वमवश्यं तत्र
स्युपगंतव्यं यजादौ मत्वर्थीये च पूर्वस्य स्वरूपेण सिद्धस्यापि पदसंज्ञापूर्विकायां भसंज्ञायां कर्तव्यायां पदांततया विधानं प्रति निरस्ता
निवद्भवतीति स्थानिवत्वप्रतिषेधार्थं॥अन्यथा वेतस्वानित्यत्र कुमुदड्वेतसेभ्यड्मदिति चातुरर्थिक ड्मतुपि उित्वाट्टिलोपे मादुपधाया
इति वत्वे च तसौ मत्वर्थ इति भसंज्ञायां टिलोपस्य स्थानिवत्वात्सकारांतभागे तदप्राप्तौ न पदांतेति स्थानिवत्वनिषेधात्सकारो पूर्वं पर
मिति सांतस्य पदत्वे रुत्वप्रसंगात्॥सति च भसंज्ञायां पदविधित्वेन पदांतेति स्थानिवत्वनिषेधात्सकारांतस्य भसंज्ञाप्रवृत्तौ आकडा
रान्नियमात्पूर्वप्रवृत्ति पदसंज्ञाया बाधात्स्थानिवत्वनिषेधेन सांतस्य भसंज्ञायां स्थानिवत्वप्रवृत्ति संपादनमात्रेण चरितार्थया
पदसंज्ञया सह विकल्पासंभवाच्च वेतस्वानित्यत्र सर्वथा रुत्वाभावसिद्धिः एवं प्रकृतेपि भसंज्ञायां स्थानिवत्वनिषेधादिकारांत
भागस्य प्रवृत्तया भसंज्ञया प्रथमप्रवृत्तस्य पदत्वस्य बाधाद्घाणि स्थानिवत्वनिषेधाप्राप्तौ कौस्तुभं न स्थानिवदित्यवश्यमाश्रय
णीयमिति॥॥इत्यष्टमी॥यदा भसंज्ञायां पदकार्यमभ्युपगम्यते तदानुकंपितः षडंगुलिदत्तः षडिक इति न सिध्येत् तथा हि षडंगु
लिदत्तशब्दादनुकंपार्थे बह्वचो मनुष्यनाम्न इति ठच् ठाजादावूर्ध्वं द्वितीयादच इत्यंगुलिशब्दलोपे ठस्य कादेशे यस्येति चेत्सकारस्य

येचभसंज्ञायांयस्येतिलोपस्यस्थानिवत्वात्पदत्वनिरस्याजश्त्वमिष्यते॰तथाचवर्त्तिकंभसंज्ञायामुत्तरपदलोपेषषःप्रतिषेधः
५ 5 असिद्धश्चः स्थानिवत्वादितितन्नस्मिन्पक्षेनयुज्यते॥नचैवंभसंज्ञायाःपदकार्यत्वानभ्युपगमेवेतस्वानितिरूपासिद्धिः।पदेअंत
ःपदांतस्तद्विधिंप्रतिनस्थानिवदित्यस्यार्थाश्रयणात्॥भसंज्ञायापिवपदसंज्ञायामपिस्थानिवत्वनिषेधेनसांतभागस्यपदत्वाभावे
नरुत्वाप्रसंगात्॥तस्माद्भसंज्ञायाःपदकार्यत्वानाश्रयात्तस्याःस्थानिवत्वनिषेधाभावेनसखीअसिसत्रभिन्नावधिकयाभसं
ज्ञयापूर्वसिद्धस्यपदत्वस्यावाधान्नपदांतेतिस्थानिवत्वनिषेधादेवयणोवलिलोपस्यचाभावान्नक्कोलुप्तंनस्थानिवदित्याश्रय
णीयमिति॥इतिनवमी॥हंतैवंघटकुघांप्रभातंषड्विकसिध्यर्थंभसंज्ञायाःपदकार्यत्वमनभ्युपगच्छतात्वयावेतस्वानितिरूप
सिद्धयेपदेअंतःपदांतपदांतविधिंप्रतिनस्थानिवदित्याश्रितं।एवंचसरवमुरित्यत्रयणिकृतेयेअच्लोपस्यस्थानिवत्वनिषेधा
लाभात्तदर्थंक्कोलुप्तंनस्थानिवदित्यवश्यमाश्रयणीयंइति।उगिदचामितिसूत्रेअधातुग्रहणप्रयोजनत्वेनगोमंतमिच्छतिगोम शिवः
त्यतिगोमत्यतेरप्रत्ययःगोमान्यवमानितिभाष्यकारेणोपन्यस्तस्योदाहरणस्यानुपपत्तिश्चाएवंप्राप्तेब्रूमः।सखीयवद्रस ५
त्रवलिलोपात्सरवत्वादच्लोपेअर्द्धमात्राधिकप्रथमविधेयनिर्देशसामर्थ्याद्विलोपात्परस्मादपिपूर्वपलोपेविलोपासरवा

दल्लोपस्यस्थानिवत्वात्प्रत्ययांतभूतक्यजकारायेक्षेऽन्तरंगेकर्तव्येवहिर्भूतन्निचयेस्यस्ययलोपस्यवहिरंगस्यासिद्धत्वाद्भव
धानादेवयणोप्राप्तेनस्थानिवत्वनिषेधापेक्षा।अथवानपदांतस्सूत्रेणैवस्थानिवत्वनिषेधः।नचपदांतस्यविधानंप्रतिनस्था
निवदितिसुच्यमानेवेतरूढानितिरूपासिद्धिः‧पदसंज्ञायांस्थानिवत्वनिषेधेनसोंतस्यपदत्वात्भसंज्ञायाश्चस्थानिवत्वेनाभावादि
तिवाच्यं‧पदंसद्भसंज्ञंभवतीतिभसंज्ञायाःपदकार्यत्वाभ्युपगमेतस्यामपिस्थानिवत्वनिषेधेनप्रवृत्तयाभसंज्ञयापदत्वस्यवा
धात्‧नचैवंषडिकद्रूस्तत्रापिभसंज्ञयापदत्वबाधेजश्त्वातिप्रसंगइतिवाच्यं।शिवजसुपरिविशाखेत्यत्रसिद्धमेकाक्षरपूर्वपदा
नामुत्तरपदलोपवचनादिसुत्तरपदलोपः।वचनस्यद्वितीयादचऊर्ध्वस्यलोपविषयेसंज्ञायांस्थानिवत्वज्ञापकत्वात्।तर्हि
अनुकंपितोवागाशीर्दत्तइत्यनुकंपार्थेवह्वचोमनुष्यनाम्नइतिठचगाजादावूर्ध्वमितिशीर्दत्तशब्दस्ययस्येतिचेत्याकारलोपे
चतस्यस्थानिवत्वाभावात्गांतभागस्यभसंज्ञायाअभावात्।पूर्वसिद्धपदत्वान्निवृत्त्यगकारश्रवणप्रसंगात्।स्थानिवत्वाभावे
नगांतभागस्यभसंज्ञाथमुत्तरपदलोपवचनंतत्त्वानर्थकंभसंज्ञायाःपदकार्यत्वाभ्युपगमेद्वितीयादचऊर्ध्वस्यलोपेपितस्यां
नपदांतेस्थानिवत्वनिषेधेनगांतस्यभसंज्ञयापदत्वनिवृत्त्याकुत्वजश्त्वयोर्निवृत्तेस्तत्संज्ञायस्याचार्यद्वितीयादचऊर्ध्वस्यलो।

येभसंज्ञयापदत्वान्निरस्यकुत्वादिकमस्तिस्थानिवत्वमितितत्तोवाधिकसिध्यर्थंउत्तरपदलोपवचनं॥ एवं चैकाक्षरपूर्वपदत्वे
६ त्यिषष्ठजादिवचनात्सिद्धमिति द्विवचनेसोत्र एवद्वितीयादश्चतुर्ध्वस्यलोपेभसंज्ञायांस्थानिवत्वेनषड्डिकसिद्धिरप्यूह्या·
6 अतएववार्त्तिकेषड्डिकसिद्धौपाणिनिसूत्रविन्यासादधिकयत्नस्यावश्यकर्त्तव्यत्वेनततएवतत्सिद्धौषड्डिकादिसिद्धिमगणय
ताभगवताभाष्यकारेणोक्तं। अथवायथैवान्यान्यपिपदकार्याणि उपप्लवंतेकुत्वंजश्त्वमितिएवमिदमपिपदकार्यमुपप्लोष्य
तेकिंभसंज्ञानामितिनत्वेवंस्वाद्युत्पत्तेःपूर्वंनपदांतेतिस्थानिवत्वनिषेधलाभेनापिवेतस्थानितिसिद्धयेभसंज्ञायाःपदकार्य
त्वस्यावश्यमभ्युपगंतव्यत्वेनस्वाद्युत्पत्त्यनंतरंसखीअसीत्यत्रभसंज्ञायामपिस्थानिवत्वनिषेधेनादीकारांतभागस्यप्रवृत्ता
याभसंज्ञायासहप्रवृत्तस्यप्रवृत्तस्याप्रथमवृत्तस्यवाधादीकारस्ययणिकर्त्तव्येनपदांतेतिस्थानिवत्वनिषेधाभावात्तदर्थं
क्वौलुप्तंनस्थानिवदित्यवश्यमाश्रयणीयं। नचपरत्वान्नित्यत्वादंतरंगत्वात्प्रतिपदविधित्वाच्चस्वादीनामुत्पत्तेःपूर्वमेवक्विलो शिवः
पेस्थानिवत्त्वाभावात्तदनंतरंसत्येनपाणिनदोषः। क्विलियत्लोपस्यवर्णाश्रयत्वेनप्रत्ययलक्षणाभावादप्राश्रयणाश्रेष्यत्वेमाणे ६
त्वात्इतिवाच्यं। लोपोव्योरित्यत्रार्द्धमात्राधिकप्रथमविधेयनिर्देशसामर्थ्यात्वल्लोपइत्यत्र अंतरंगत्वात्प्रतिपदवि।

धित्वाच्च परमप्यतो लोपं बाधित्वा विलोपे अतो लोपे च कृते वर्णाश्रयेपि प्रत्ययलक्षणे वलि लोपवदिहापि यलोपप्रसंगाश्रा
वता भाष्यकारेण लोपं बाधित्वा विलोपे च कृते वर्णाश्रये च प्रत्ययलक्षणे लोपो व्योर्वलीत्यत्र यदि पुनर्वर्णाश्रयाण्यपि कानि
चित्प्रत्ययलक्षणानि भवंतीति आदिग्रंथेन क्वौ प्रत्ययलक्षणे न च वलि लो[illegible]यस्याश्रितत्वादिति चेन्न उच्यते अर्द्धमात्रा
धिक प्रथमविधेयनिर्देशसामर्थ्यात् क्वौ वलि लोपस्यावश्यकत्वे नानुपपद्यमाने न प्रत्ययलोपे प्रत्ययलक्षणमित्यश्रुतस्य
वर्णाश्रयेनास्ति प्रत्ययलक्षणमित्यर्थप्रतिपादकस्य द्वितीयप्रत्ययग्रहणस्याबाधकस्यनाद्धर विलोपात्परस्मान्नित्यादपि व
लि लोपस्य बलवत्वेन पूर्वप्रवृत्तिकल्पनं अबाधेनोपपत्तौ बाधकल्पनस्यान्याय्यत्वात्॥ एवं च कंडूर्लोस्नूरित्यत्र बाह्यांतरंग
स्य बलवत्वादंतरंगात्प्रतिपदविधेरपि विलोपात्पूर्वमतो लोपे विलोपयलोपयोर्युगपत्प्राप्तयोः परस्मान्नित्यादपि विलो
पात्पूर्वं यलोपे ततो विलोप इति सिद्धं कंडूर्लोस्नूरिति तस्मात् क्वौ वलि लोपे प्रत्ययलक्षणस्यानाश्रयणेन परत्वादिह तु भिः
स्वाद्युत्पत्तेः पूर्वं वलि लोपे कृते तदनंतरं भसंज्ञया पदत्वनिवृत्तौ स्यादिव द्वा बात्सस्यपि यणि न दोषः। भाष्यकाकारेण तु क्वौ प्र
त्ययलक्षणं तु क्वौ लोपि क्वावुपसंख्यानमिति वार्त्तिकप्रत्याख्यानदिक्प्रदर्शनमात्रं अत एव यदि पुनर्वर्णाश्रयाणीतिप

द्यर्थोक्तिः तस्मात्सखुरिति भाष्योदाहरणे स्वाद्युत्पत्तेः पूर्वं न पदांतेति स्थानिवत्त्वनिषेधेन यणः लोपयोरभावात्तदनंतरमादौ
७ भसंज्ञया पदत्वनिवृत्तौ स्थानिवत्त्वेन सत्यपि यणि यलोपाप्रसंगात् तदुदाहरणान्यथानुपपत्त्या नैवं विज्ञायत इति भाष्यं पक्ष
7 द्वयं गीकारपरतया योज्यमिति स्थितं ॥ अथवात सौमत्वर्थ इति भसंज्ञयैव पदकार्यमभ्युपगम्यते आकांक्षावशान्मंडूकप्लुत्या
वातत्र पदसंज्ञानुवृत्तेस्तावतैव चेतस्वानिति रूपसिद्धेः । एवं च भसंज्ञायां स्थानिवत्त्वानिषेधेन षड्डिकादिसिद्धौ उत्तरपदलोप
वचनस्य न ज्ञापकतापेक्षा । प्रकृतेपि सखी अस्येत्यत्र भसंज्ञायां स्थानिवज्ञावात्तुल्याचधिकत्वाभावेन पूर्वसिद्धपदत्व
निवृत्त्या न पदांतेति स्वाद्युत्पत्त्यनंतरमपि अजकारलोपस्य स्थानिवत्त्वनिषेधात्तदपेक्षस्य यणोभावः भवतु वा भसंज्ञया
अपि पदकार्यत्वं तथापि तस्यां स्थानिवत्त्वनिषेधः । न पदांतेत्यत्र हि पदांतस्य विधानं प्रति स्थानिवदिति भावसाधनो विधि
शब्द आश्रितः । पदांतस्य च विधानं द्विधा स्वरूपतो असिद्धस्यैव पदांतस्य क्वचिद्विधानात् यथा कानि संतीत्यत्र क्वचित्तु स्वरू शिवः
पतः सिद्धस्यैवापूर्वपदसंज्ञाविधानात् यथा चेतस्वानित्यत्र स्वरूपतः सिद्धस्यैव सकारस्यापूर्वपदसंज्ञाविधानाद्विशेष ७
णविधानादपि विशिष्टविधानमिति पदांतस्य विधानमिति । इह तूभयरूपाभावः षड्डिकः सखुरित्यत्र सकारेकारयोरंत

वर्तिन्या विभक्त्या स्वरूपतः पदांतत्वेन च स्वरूपतः सिद्धयोर्यचि भमिति पदसंज्ञापूर्विकायां भसंज्ञायां कर्तव्यायां पदांतस्य विधा
नाभावात् स्थानिवत्वाबाधेन भिन्नावधिकया भसंज्ञया पूर्वसिद्धपदत्वस्याबाधाज्झश्त्वनिरस्या षष्ठिक सिद्धिर्न पदांते स्थानि
वत्वनिषेधाद्यणभावः एवं च पूर्वव्याख्याविसत्र कुमार्यै ब्राह्मण्यापि सुदाहरणे कर्जंतात्कर्तरि क्विबिति प्रथमव्याख्याने
चैपदस्य तदप्युपपद्यते एवं सति लोपो व्योर्वलीति अत्र क्वौ प्रत्ययलक्षणेन यलोपाश्रयणेपि न दोषः वपजकारलोपस्य
स्थानिवत्त्वाद्विभिन्ननिमित्ते सत्यपि यणि क्विप्रत्ययनिमित्ते वलि लोपे यणः सिद्धत्वाद्यलोपाप्रसंगात्. नन्वेवमपि क्वौ लुप्तं
न स्थानिवदिति संगीकारे कुमार्यै ब्राह्मणायेति कार्जंतोदाहरणानुपपत्तिः। यणि कर्तव्ये न पदांतेति स्थानिवत्वनिषेधेपि आ
पनद्याङ्गस्याद्विधेरपदांतविधित्वेन स्थानिवत्वनिषेधात्. पूर्वस्मादुत्तरस्य विधिं प्रत्यपि वेभिदितामाथिते क्वप्यपि वलिसे
तदर्थं स्थानिवद्भावस्य भाष्यकारेण तत्राश्रितत्वाद्वाद्विधौ कपजकारलोपस्य स्थानिवत्वाद्व्यवधानेन याडुत्तरस्य ङितो वि
धीमानस्याटो प्राप्तेः। न च नद्यंतादंगाद्विहितस्य ङितः इत्युचनस्य याडागमद्भतिनदीग्रहणस्य षष्ठ्यंतविहितस्य विशेषणत्वावि
ज्ञानेन द्युमरत्वानाश्रयणाद्वाटि कर्तव्ये सत्यपि स्थानिवत्वे आड् भवत्येवेति वाच्यं ङ्याप्प्रातिपदिकादिति स्वादिविधानेपि

पूर्वस्मादुत्तरस्यविधिंप्रतिस्थानिवद्भावान्नयंतद्विधानाभावेनविहितविशेषणपक्षेपिनदीग्रहणस्याटोऽप्राप्तेरितिचेदुच्यते·
९ पूर्वस्मादप्युत्तरस्यविधिंप्रतिस्थानिवद्भावस्यप्रयोजनाभावेनाश्रयणात्तावतावेभेदितेत्यत्रभिद्यशब्दाद्यद्रु·तान्तत्वप्रम
8 यीरंबाधित्वानित्यत्वादल्लोपयलोपयोःकृतयोःप्राप्तस्यएकाचउपदेशेनुदात्तादितीट्प्रतिषेधस्याल्लोपस्यस्थानिवद्भावा
द्विधानान्निवृत्तिःप्रयोजनंकृतयोरप्यल्लोपयलोपयोरत्रचोचलादित्वेनस्वतइट्प्राप्तेरविघातादिटोपिनित्यत्वेनर
त्वादल्लोपयलोपयोःपूर्वमेवेट्सिद्धेस्तस्यांदशायांएकाचउपदेशेनुदात्तादितीट्प्रतिषेधस्यप्राप्त्यभावात्पूर्वह्यपवादाः
प्रवर्त्तन्तेपश्चादुत्सर्गाइतिन्यायःप्रकृतेनाश्रीयतेनतुपरिहृत्यापवादविषयंततउत्सर्गोभिनिविशतइतिकृतयोरल्लोपय
लोपयोरेकाचउपदेशइतीट्प्रतिषेधादिडनित्यइतियस्यचनिमित्तंलक्षणान्तरेणविहन्यतेनतदनित्यमितिन्यायात्·नापि
मथितं——मस्यमाथितिकइत्यत्रटस्येकादेशेयस्येतिचेतिलोपेचइकादेशस्यस्थानिवद्भावादेशइतिस्थानिवद्भावादिसु शिवः
सुक्तान्ताद्धितिप्राप्नुवतःकादेशस्यतांतात्पूर्वस्मादुत्तरस्यटस्येकादेशंप्रतियस्येतिलोपस्यस्थानिवद्भावान्निवृत्तिःप्रयो ९
जनंअज्ञादिसन्निपातनिमित्तोयस्येतिलोपस्तद्विघातकस्येकादेशस्यनिमित्तंनेतिसन्निपातपरिभाषयाकादेशनिवृत्तिस्स

भवात्र ठस्येकइत्यत्र ठस्येति वर्णनिर्देशपक्षे तांत्रादंगात्परस्य ठस्य कादेशविधाने नाल्विधित्वेन स्थानिवत्त्वाभावाच्च । नाप्यपी
पचन्नित्यत्र पचेर्लर्ये नाद्युडि· चङि· णिलोपे चङु· एकादेशे तस्यावयवत्वात्सिजभ्यस्तविदिभ्यश्चेति प्राप्नुवल्लोपो जुसादेशस्याणि
लोपैकादेशयोः स्थानिवद्भावान्निवृत्तिः प्रयोजनं अभ्यस्तग्रहणस्यासि च साहचर्येपि वल्लवतोलङि यत विदि साहचर्यात्त
त्र विषयविसानादेवजुसादेशनिवृत्तिसिद्धिः विदेश्चाम्रवहितग्रेर्लङ्ग्रेवसंभवात् । अन्यथावोभूवन्नित्यत्र यङ्लुङ्ताद्दु
ङि· हेर्जुसादेशप्रसंगात् । नच तत्र परत्वाद्यस्य हलइत्यत्र यस्येति योगविभागादंतरंगं प्रतिपदविधिमपवादविधिमपि लुकं
वाधित्वात्तोलोपस्य स्थानिवद्भावाद्यवधानाज्जुसभाव इति वाच्यं । यस्येति योगविभागाद्यङ्लुक्यतोलोपं गीकारे तस्य
स्थानिवद्भावादेव जंगमो जंघनश्चंखनो दरीदृशो देद्यः सनीस्रंसोदनीध्वंसइत्यादिषु गमहनजनखनघसां लोपः ङि त्यन
ङि· स्वदृशोङि· गुणः दीङो मुडचि क्ङिति अनिदितां हलइत्यादिसूत्रैरुपधालोपगुणयुडुपधानकारलोपप्रसंगात् । अत्र
त एव धातुवृत्तौ विदिसाहचर्याद्दक्ष्यस्तग्रहणस्य लङ्विषयत्वविसानादेवावोभूवन्नित्यत्र लुङि· जुसभावः समर्थितः । ना
पितृत्वं नीत्यत्र प्रत्ययस्य यणि कृते प्राप्तस्य वलादिलक्षणस्येटो निवृत्तिः पूर्वस्मादपि विधौ स्थानिवद्भावाश्रयणस्य प्रयोज

नमार्धधातुकस्येड्वलादेरित्यत्रांगाधिकारादंगात्परस्यार्धधातुकस्येड्विधाने पूर्वस्मादंगात्परस्यार्धधातुकस्येड्विधिं प्रतिश्च
२ जादेशस्य यणः स्थानिवद्भावेन वलादित्वाभावादिणि न कृतेः सुवचत्वादिति भावो । अंतरंगत्वादिति कर्तव्ये बहिरंगस्य यणोऽसि
१ द्धत्वेन वलादित्वाभावादिनिवृत्तेः । अचः परस्मिन्पूर्वविधावित्यत्र भाष्ये वेभिदितेत्यादिप्रयोजनोपन्यासेन पूर्वस्मादप्युत्तरस्य
विधिं प्रति स्थानिवद्भावाश्रयणं तु निस्तात्पर्यकमेव· तथाहि· तत्र विधिग्रहणस्य प्रयोजनप्रश्ने वेभिदितेत्यादि सिद्धये सर्ववि
भक्त्यंतसमासविज्ञानेन पूर्वस्मादपि विधौ स्थानिवद्भावः प्रयोजनमुपन्यस्तं न ततश्च तत्प्रयोजनप्रत्याख्यानपरेणैतानि संति प्र
योजनानीत्युत्तरग्रंथे वेभिदितेत्यादिप्रयोजनानामन्यथासिद्धत्वेपि तत्परीक्षां विनैव यदि पूर्वस्मादपि विधौ स्थानिवद्भावद्
शास्त्रेपेक्षितस्तदा अचः परस्मिन्नित्यत्र पूर्वस्येति संबंधसामान्ये षष्ठीसमाश्रयणेनापि तल्लाभान्नैतद्विधिग्रहणस्य प्रयोजनं
भवितुमर्हतीति पूर्वस्मादपि विधौ स्थानिवद्भावाश्रयणस्य फलाचिंतयैव प्रवृत्तत्वात् । अन्यथोक्तप्रयोजनानामन्यथासिद्ध शिवः
त्वेन गौरवमात्रफलकस्य तस्याश्रयणानुपपत्तेः ॥ भवतु वा पूर्वस्मादप्युत्तरस्य विधिं प्रति स्थानिवद्भावेन कुमार्यै ब्राह्मणाये २
त्यत्र स्थानिवद्भावेन व्यवधानादाटोप्राप्तिः ॥ नदीग्रहणस्य षष्ठ्यंतत्वेन विहितविशेषणत्वविज्ञानात् । न च प्रत्ययविधानेपि

स्थानिवत्त्वं। अचः परस्मिन्नित्यत्रादेशाद्वा पूर्वत्वविज्ञानेन नवैयाकरणः सौवश्वइत्यत्र यणः स्थानिवत्त्वादायावौ प्राप्तिमाशंक्य
वार्तिककारेणाचः पूर्वत्वविज्ञानादैचोः सिद्धमित्यनादिष्टादचः पूर्वत्वस्य समाश्रितत्वात्तन्नाजादेशस्य स्थानिवद्भावदर्शन
याभाचः पूर्वस्य विधानासंभवेन कर्मसाधनविधिशब्दस्य माश्रयणीयत्वात्प्रत्ययविधानकाले चः पूर्वस्मादुत्तरस्य विधीय
मानकार्याभावात्स्थानिवत्त्वाप्रसक्तेर्नद्यंतादेवप्रत्ययविधानात्तस्मात्कुमार्यै ब्राह्मण्यै इत्युदाहरणे ण्यजंतात्त्विचितिग्युत्पादना
नुपपत्तिः नापि सखायुरित्युदाहरणान्यथानुपपत्त्या चौ सुतं न स्थानिवद्विसाश्रयणीयमिति। न च उगिद्चामिति सूत्रे अचतिग्र
हणस्य नियमार्थत्वादेव धातुमात्रन्तिसिद्धे अधातुग्रहणानर्थक्यमाशंक्य अधातुभूतपूर्वस्य संप्रति धातोर्नुमर्थमधातुग्र
हणं व्यवस्थाप्य भाष्यकारेण यन्यस्तस्य गोमंतमिच्छति गोमास्यति गोमत्यतेरप्रत्यये गोमान्यवमानित्युदाहरणानुपपत्तिः
क्लौ सुतं व स्थानिद्विस नाश्रयणेनुमित्यत्वसंतस्येति दीर्घत्वेचक्य चोतो लोपस्य स्थानिवद्भावादिति वाच्यं॥ अधातुभूतपूर्व
स्यनुमर्थमारब्धधातुग्रहणस्य सामर्थ्यादेव स्थानिवद्भावबाधनात्। न च गोमानिवाचरति गोमति गोमाति गोमतेरप्रत्ययः गोमा
नित्यत्र स्थानिवद्भावबाधनं विनाचरितार्थस्याधातुग्रहणस्य ण्यजंतधातोर्न तद्बाधकमिति वाच्यं। अं चुतुरसजातीयस्यो

पदेशिकधातोरुत्वात्सदिस्यादेर्नियमाश्रयणादपिप्रत्ययांतधातुमात्रस्यानुमानमव्यावृत्त्यभावेनस्वविषयेस्थानिवद्भावबाधनं
१० विनातस्यप्रयोजनांतराभावात्-नचैवमपिसृजतेर्गोमानित्यत्रात्वसंतस्येतिदीर्घविधौस्थानिवद्भावनिवारणार्थंक्वौलुप्तंनस्था
10 निवदित्यवश्यमाश्रयणीयमितिवाच्यं।नपदांतेत्यादिनादीर्घविधौस्थानिवद्भावनिषेधात्।नचनपदांतेतिसूत्रेणयायच्यते-या
यत्क्रियापह्नियैत्याह्नोकुत्वादिषुस्थानिवत्त्वनिषेधार्थंपूर्वत्रासिद्धेनस्थानिवदितिवार्त्तिकमाश्रित्यवरेयलोपवर्जंद्विर्वचनादिषु
स्थानिवत्त्वनिषेधारंभस्यप्रत्याख्यातत्वाद्दाष्टमिकदीर्घादन्यत्रादिग्रहणस्यप्रकारार्थत्वसूचनेनपूर्वत्रासिद्धमेवप्रत्याख्याने
नदीर्घविधौस्थानिवद्भावनिषेधप्रत्याख्यानतात्पर्यावश्यंभावाभावात्।यथयेतिस्येतिसूत्रेभाष्यकारेणमांतस्यसुप्यमानेय
त्रैवमांनेयुष्मदस्मादीनत्रैवैतेआदेशाःस्युरितियुंथेनयुष्मदस्मदोरुत्तकरोतीणिजंतयोर्णिलोपेटिलोपेचमांतयोस्त्वाहादे
शयोरन्यथानुपपत्त्यापिक्वौलुप्तंनस्थानिवदित्यर्थाश्रयणंमांतयोस्त्वाहादेशाइतिवचनसामर्थ्यादिवस्थानिवद्भावस्यबाधस्य शिवः
प्रतिपत्तुमशक्यत्वात्॥इतिश्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यमहाव्रतयाजिश्रीमदप्पयदीक्षितकृ १०
तौपाणिनीयवादनक्षत्रमालायांक्वौलुप्तंनस्थानिवदित्यर्थस्यनिराकरणसमर्थनश्रवणनक्षत्रवादः॥अथयदुक्तं१

अंतर्भूतण्यजकार्ये सेंतरंगे यणि कर्त्तव्ये वहिर्भूतल्विषये स्वस्य वहिरंगस्य वलिलोपस्यासिद्धत्वाद्यणभावइतितन्नोप
पद्यते॰ नाजानंतर्ये वहिष्ट्वप्रक्लृप्तिरिति परिभाषया वहिरंगस्य वलिलोपस्यासिद्धत्वाभावाद्यणभावनिषेधादिसेतत्प्रसं
गात्॥ कथांतरं प्रस्तूयते नाजानंतर्य इत्यस्याः परिभाषायाः क्वचिद्ग्रंथे यत्रांतरंगे वहिरंगे चाचोरानंतर्यमाश्रीयते तत्र व
हिरंगपरिभाषा नाश्रीयत इत्यर्थो व्याख्यायते॥ क्वचित्तु यत्रांतरंगे चोरानंतर्यमाश्रीयते तत्र वहिरंगं नासिद्धमिति प्रतीयते
अतो विप्रतिपत्तिः तत्रांतरंगे जानंतर्याश्रयणे वहिरंगं नासिद्धमित्येवन्याय्यं न धातुलोप आर्द्धधातुके इत्यत्र भाष्यकारे
णार्द्धधातुकग्रहणस्य लोपविशेषणत्वे गुण्ये इः प्रेद्ध इत्यत्रानार्द्धधातुकनिमित्तस्याप्याज्ञुणस्य प्रतिषेधः स्यादिसाशंक्यएक
पदाश्रयत्वादंतरंगप्रतिषेधेवत्तव्ये यदर्द्धयाश्रितस्य वहिरंगस्य गुणस्यासिद्धत्वात्प्रतिषेधाभावइतिपरित्तृतत्वादंत
रंगवहिरंगयोर्यत्र क्वचिदजानंतर्याश्रयेणमात्रेण वहिरंगपरिभाषानिषेधे हि तत्समाधानानुपपत्तिः अत एवतत्रकैयटेना
पि नाजानंतर्य इति निषेधात् कथं परिभाषाप्रवृत्तिरिति साशंक्य यत्र प्रतिषेधसूत्रनास्य चोरानंतर्याश्रयणमित्यहेष इत्यने
न ग्रंथेन अक्षद्यूरिति दृष्टांतमुपन्यस्यांतरंगेणचाजानंतर्याश्रयणे वहिरंगपरिभाषानिषेधो नान्यत्रेत्यभिप्रायेण समाहितं॥ ॥

इति प्रथमा कक्ष्या॥ यद्यंतरंगबहिरंगयोरन्यतरस्यानंतर्याश्रयणमात्रेण बहिरंगपरिभाषानिषेधो न स्यात्तर्हि दाहृसोमादि सूत्रभा
११ ष्यगृह्यसंज्ञायां तस्यासिद्धत्वाद् द्वादेशप्रतिषेध इति वार्त्तिककारेणोः यन्यस्तं मादिति सूत्रविन्यासे अमी अत्र अमी अ सते
अमू अत्र अमू आसाते इत्युदाहरणेषु मुत्वमीत्वयोः पूर्वत्रासिद्धमित्यसिद्धत्वाद्यादिप्रसंजनमनुपपन्नं स्यात् एकपदाश्र
यत्वेनांतरंगे षीत्वादिषु कर्त्तव्येषु पदद्वयाश्रयत्वेन बहिरंगणायोः मयादीनामसिद्धत्वेन पूर्वाभावे पूर्वत्रासिद्धमित्यस्याप्रवृत्तेः
अतस्तदन्यथानुपपत्त्या बहिरंगेप्यजानंतर्याश्रयणे बहिरंगपरिभाषानिषेधोवश्यमभ्युपगंतव्यः॥ अत एव तत्रैकेप्येतेना
विपदयर्थमाशंक्य नाजानंतर्याश्रयणे बहिरंगपरिभाषानिषेधादि सैव परिहृतं॥ अत एव हरदत्तेनापि छ्वोः शूडनुनासिके च
त्यत्र प्रसंगाद्यत्रांतरंगे बहिरंगे वा चोरानंतर्यमाश्रियते तत्र बहिरंगपरिभाषा न प्रवर्त्तते इति नाजानंतर्य इत्येतत्परिभाषार्थो
व्याख्यातः। धातुरुत्तावपि श्यन्विकरणादौ दिव् धातौ चैतत्परिभाषार्थो व्याख्यानः॥ अचोरानंतर्यं यत्रांतरंगे बहिरंगे वाश्रीय शिवः
ते न तत्र बहिरंगपरिभाषा प्रवर्तते इत्यर्थ इति। यत्तु न धातुलोप इति सूत्र बहिरंगे अजानंतर्याश्रयणेपि बहिरंगपरिभाषाया ११
गुणनिषेधपरिहारः कृतस्तद् हरदत्तस्य वचनमेव॥ न हि तत्रांतरंगे निषेधे कर्त्तव्ये बहिरंगस्यासिद्धत्वात् गुणसिद्धिः गुणशास्त्र

स्यासिद्धत्वेन निषेधाभावान्निषेधनिवृत्त्यावपि गुणकार्यस्यासिद्धत्वेनैव स्वकार्यप्रवर्तनात्· यावद्गुणशास्त्रप्रवृत्तिनिषेधशा
स्त्रस्यापि प्रवृत्त्यास्तस्यासिद्धत्वात्॥ न च गुणशास्त्रं निषेधशास्त्रदृष्ट्याद्यसिद्धं स्वलक्ष्ये सिद्धमेवेति वाच्यं। शास्त्रदृष्ट्यभावात्। प्र
तियत्तुर्वैयाकरणस्य गुणशास्त्रोपस्थितिसमये निषेधशास्त्रस्याप्युपस्थितेस्तया च हि रंगपरिभाषया गुणशास्त्रस्यासिद्धत्व
ज्ञानेन गुणशास्त्रस्यासिद्धत्वज्ञानेन गुणनिवृत्तिबुध्यभावात् तदसाधकत्वं भ्रमात्पतेस्तस्मान्नैव विशेषो गुणशास्त्रस्य निषिद्धत्वे
न सिद्धत्वे न वा यतः शास्त्रं स्वकार्यं न प्रवर्तयतीति दृश्यते हि तत्र सूत्रस्योपरि प्रसारव्यानसूत्रार्थविचारवेलायामेवं जातीयमेकेद्
तिपरीक्षारहितमनादराधिकं वचनं भाष्यकारस्य यथा तत्रानुपदमेवार्धधातुकग्रहणस्य प्रयोजनं प्रश्नानंतरं त्रिदावद्वोत्तप
भेरोरवीतिद्वितिप्रसुदाहरणं तदपरीक्षैव विंपुनरित्यादिविचारारंभः॥ तत्रार्धधातुकग्रहणस्य लोपगुणवृध्युभयविशेषण
तयाभ्युपगमेपि भेद्यतद्वसाद्यर्थमवश्यमाश्रयणीयेनन्यपदार्थनिर्देशकस्यार्धधातुकपदस्याभावेपि एकाचो द्व इत्यत्रैकाच्यद
द्वावगंतुमशक्येन बहुव्रीहिनिर्देशेनेव रोरवीतीत्यत्र निषेधाप्रसक्तेः। क्ङितिचेति सूत्रे च अन्यथा वास्यतंत्रपरीक्षारहितस्याव
गंतुमशक्यत्वात्स्वतंत्रभाष्यपरीपस्थितमाक्षेपसमाधानमपि यथामूलहृदयमेव प्रवृत्तमिति। अत एव न धातुलोप इत्यत्र हरदत्ते

न उपेद्ध इस्तत्र गुणनिषेधे गुणस्यासिद्धत्वमाशंक्य नाजानंतर्य इति निषेधादसिद्धत्वाभाव उक्तः ॥ इति द्वितीया कक्ष्या । अंत
१२ रंग एवाजानंतर्याश्रयणे बहिरंगपरिभाषानिषेधः न बहिरंगे· नचाद्सो माद्दित्यत्र मा स्वगद्यसंज्ञायामिति वार्तिके नामीत्रा
12 सते इत्यादौ अयादिप्रसंजनानुपपत्तिः । अमी अत्रेत्यादौ अयादीनामीत्वादीनां च युगपत्प्रसक्तिसमये समकालोपस्थितयोर
सिद्धं बहिरंगमंतरंग इति पूर्वत्रासिद्धमित्यनयोर्विप्रतिषेधे परं कार्यमिति परत्वात्प्रबलेन पूर्वत्रासिद्धत्वेन बहिरंगासिद्धत्वस्य
बाधनात् · बहिरंगासिद्धत्वं हि वाह ऊठित्यत्र ज्ञापितत्वात् पूर्वं यथा बहिरंगासिद्धत्वपूर्वभावात् पूर्वत्रासिद्धमित्यस्यासंभवात्तथा
पूर्वत्रासिद्धत्वेनांतरंगाभावाद्बहिरंगासिद्धत्वस्याप्यसंभवद्वस्तुभयासंभवरूपविप्रतिषेधस्यापि सत्वात् · नच पूर्वत्रासिद्धेना
स्ति विप्रतिषेधोऽभावादुत्तरस्येति व्याघातात् बहिरंगासिद्धत्वकर्तव्ये पूर्वत्रासिद्धत्वस्यैवाव सिद्धत्वादयादिप्रसंजनानुप
पत्तिः । पूर्वत्रासिद्धमधिकारः परस्य पूर्वं प्रति पूर्वत्रासिद्धत्वविज्ञानार्थमिति वार्तिककारेण तस्याधिकारत्वव्यवस्थापनात्तत उ शिवः
त्तरसूत्राणामेवासिद्धत्वेन तस्यैवासिद्धत्वाभावात् । स्वात्मानि आश्रयविरोधाच्चाअतो न तत्रायादिप्रसंजनान्यथानुपपत्त्या बहि १२
रंगेजानंतर्याश्रयणे बहिरंगपरिभाषानिषेधकल्पनं । यत्तु तत्रैकेपठेन नाजानंतर्य इत्येव बहिरंगपरिभाषानिषेध इति परि

हतंतन्न धातुलोपइत्यत्रत्यभाष्यविरोधात्तत्रत्यस्वव्याख्यानविरोधाच्चोपेक्षणीयं। न धातुलोपसूत्रे हरदत्तवचनमपि तद्भा

ष्यविरोधादनादरणीयमिति ॥ इति तृतीया कक्ष्या ॥ मा भूदयं सोमादित्यत्रायादिप्रसंजनान्यथानुपपत्त्या बहिरंगो जा

नंतर्याश्रयणेन बहिरंगपरिभाषानिषेधस्य तत्परिभाषार्थत्वकल्पनतया तदुपपत्तेरुक्तत्वात्। किंतु ज्ञापकानुसरणेन तमर्थं

कल्पयामः तथाहि। नाजानंतर्य इत्यस्यां हि परिभाषायां सत्यनुकोरसिद्ध इत्यसिद्धवचनं ज्ञापकमुपन्यस्तं विप्रतिषेधे परं

कार्यमित्यत्र भाष्यकारेण ज्ञापकं नाम तदुच्यते यद्दृष्टं श्रुतं वानुपपद्यमानं स्वार्थोपपादकमर्थांतरं कल्पयति यथा शतवर्षजी

विनो देवदत्तस्य गृहासत्त्वं बहिर्नमितदुच्यते यदृष्टं श्रुतं वानुपपद्यमानं बहिः सत्त्वं कल्पयति ॥ यथा वा धूमो वह्निं विनानुपप

द्यमानः स्वोपपादकमेव वह्निं कल्पयति। यथा वा इह व्याकरणे प्रष्ठौह इत्यत्र प्रसारणमात्रेपि पूर्वरूपत्वेऽपि प्रत्ययापेक्षया

युगंतलघूपधेति गुणे च वृद्धिरेचीति रूपसिद्धावनर्थकादनुपपद्यमानं वृध्यर्थमूठूविधानं स्वोपपादकमेव बहि

रंगासिद्धत्वं कल्पयति। अंतरंगे गुणे कर्तव्ये संप्रसारणस्यासिद्धत्वादूठ्विधानानर्थक्याभावात्तदुपपत्तेः। तथा कोसिचद

धीत्येत्यादौ षत्वे तु किंचकर्तव्ये एकादेशस्य परद्व्याश्रयत्वेन च बहिरंगस्यासिद्धं बहिरंग इत्येव सिद्धत्वेन लक्षणमुखेनाल्ये

नाल्पेनापायेनमहतोमहतःशब्दौघात्प्रतिपादयितुंप्रवृत्तस्यवर्णमात्रमप्यनर्थकमप्रयुंजानस्यपाणिनेराचार्यस्यखलु
१३ केषांसिद्धइतिशास्त्रारंभोनुपपद्यमानःस्वोपपादकमेवार्थंकल्पयेत्‌.सचवहिरंगेजानंतर्याश्रयणेवहिरंगपरिभाषानिषे
धएवएवंतेनैवह्यर्थेनकोसिचदधीत्यस्यादौवहिरंगेणैकादेशेजानंतर्याश्रयणात्षत्वेतुकिंचकर्तव्येतस्यासिद्धत्वाभावात्
13 शास्त्रारंभउपपादितोभवेत्।नत्वंतरंगेजानंतर्याश्रयणेवहिरंगपरिभाषानिषेधेन।सत्यपितस्मिन्नंतरंगेषत्वेतुकिंचाजा
नंतर्याश्रयणाभावात्वहिरंगपरिभाषाया‌अनिषेधात्‌असिद्धत्वलाभेतच्छास्त्रारंभानुपपत्तेर्वज्रोपलभ्यमानत्वात्तस्याव
हिरंगेजानंतर्याश्रयणेवहिरंगपरिभाषानिषेधएवप्रामाणिकःसएवतत्परिभाषार्थइतियुक्तं।नचैवत्वयाज्ञापकानुसारे
णनवहिरंगाजानंतर्याश्रयणेवहिरंगपरिभाषायानिषेधकल्पनेऽन्तरंगेजानंतर्याश्रयणेवहिरंगपरिभाषानिषेधकल्प
नेनास्तघूपित्यादावंतरंगेषत्वेवहिरंगस्योठोसिद्धत्वाद्यसाभावप्रसंगः।विप्रतिषेधेपरंकार्यमित्यत्रभाष्यकारेणनाजानंत शिवः
र्यपरिभाषयास्तघूरित्यत्रयणादेशसमर्थनंचानुपपन्नंस्यादितिवाच्यं।षत्वतुकोरसिद्धइतिशास्त्रारंभेणलाघवादंतरं १३
गवहिरंगरूपविशेषोदासीन्येनाजानंतर्याश्रयणमात्रेणवहिरंगपरिभाषानिषेधकल्पनातावतैवतच्छास्त्रारंभोपपा

द्रवत्वसंभवेनातिरिक्तविशेषकल्पने गौरवाच्च। नच बहिरंगे जानंतर्याश्रयणेपि बहिरंगपरिभाषानिषेधाभ्युपगमे पचावेदं
पचामेदमित्यत्रैकादेशस्य बहिरंगस्यासिद्धत्वाभावात्तस्य च पूर्वं प्रसंतवत्त्वाबाह्योडूयहणादेत्तरोइत्यैत्वप्रसंगः॥ विप्रतिषेध
सूत्रे भाष्यकारेण पचावेदं पचामेदमित्यर्थं बहिरंगपरिभाषाश्रयणं वाउपपन्नं स्यादिति वाच्यं। अंतरंगे जानंतर्याश्रयणेव
हिरंगपरिभाषानिषेधमभ्युपगच्छतस्तवापि स्योनइत्यत्र सिवेरौणादिके नप्रत्यये कुष्ठि चांतरंगे यणि कर्तव्ये बहिरंगस्य लघू
स्या ५ पधगुणस्यासिद्धत्वाभावात्परत्वाच्च लघूपधगुणे स्योनइति रूपासिद्धिप्रसंगात्॥ विप्रतिषेधे परं कार्यमित्यत्रैव भाष्ये बहिरं
गपरिभाषयैव स्योने इत्यत्र यणि कर्तव्ये लघूपधगुणस्यासिद्धत्वप्रतिपादनं चानुपपन्नं स्यादिति तस्योभयसमाधेयत्वादिति
॥इति चतुर्थी कक्ष्या॥ ॥यद्युक्तमंतरंगे जानंतर्याश्रयणे बहिरंगपरिभाषानिषेधाभ्युपगमपक्षेपि स्योनेत्यत्रांतरंगे यणि
कर्तव्ये बहिरंगस्य लघूपधगुणस्यासिद्धत्वाभावात्परत्वाद्गुणप्रसंगइति तन्न नाजानंतर्ये परिभाषया गुणे शास्त्रस्यासि
द्धत्वे निषेधेपि सिद्धस्यैव गुणशास्त्रस्य परस्यापि अंतरंगेण यणशास्त्रेण दृष्टेर्भद्रइत्यत्र परेण पूर्वस्येव बाधनाद्यणादे
शापत्तेः॥ नचांतरंगबलीयस्त्वं हि लोकसिद्धो न्यायः विप्रतिषेधे परमित्येतत्तु एतच्छास्त्रसाधारणः संकेतः तथा च लो

विकृशास्त्रीयवचनयोर्विरोधेऽस्यासत्याशास्त्रीयवचनमेवांगीकर्तुंयुक्तमिति।शास्त्रीयस्यवहिरंगासिद्धत्वस्यनिषेधे
१४ परत्वाद्गुणःस्यादेवेतिवाच्यं।विप्रतिषेधेपरंकार्यमित्यस्यविप्रतिषेधेपरमित्येवसिद्धेकार्यग्रहणसामर्थ्यादिहोर्थेऽकृत्स्न
14 प्रत्ययविज्ञानाद्विप्रतिषेधेपरंयन्नकृत्स्नमर्हतद्भवतीति सूत्रार्थपर्यवसानेनानित्यवहिरंगोत्सर्गेभ्योलोकन्यायादेवबलव
त्स्वपिनित्यांतरंगापवादेषुकर्तव्येषुनित्यादीनांकृत्स्नमर्हत्वाभावादेवतच्छास्त्रस्यतत्राप्रवृत्तेः।।तदुक्तंजयादित्येन।।उत्सर्गो
पवादनित्यानित्यांतरंगबहिरंगेषुतुल्यबलतानास्तीतिनायमस्यशास्त्रस्यविषयइति।।अतएवभगवतावार्तिककाचार्ये
णाप्यनेनैवचाभिप्रायेणांतरंगेचप्रयोजनं।।यणेकादेशत्वोत्वानिगुणारद्विवचनान्नास्त्रोयस्वरभ्यइति विप्रतिषेधसू
त्रेणावसिद्धमेवांतरंगबलीयस्त्वमिहशास्त्रपरायेस्यापिसमर्थितं।।अचःपरस्मिन्पूर्वविधावित्यत्रभाष्यकारेणापि
प्रसंगवर्तीलोकोलक्ष्यतेइत्यादिनालोकदृष्टांतोपन्यासेनपद्यःमध्येत्यत्रपरस्मान्नित्यादपिपरत्यणादेशादंतरंगास्य शिवः
पूर्वयणादेशस्यबलवत्वंसमर्थितमितिप्रत्यक्षेतावान्नदोषः।।त्वत्पक्षेवहिरंगेप्यज्ञानंतर्याश्रयणेवहिरंगस्यासिद्ध १४
त्वनिषेधेयच्चावेदंपचामेदमित्यत्रप्रथमप्रवृत्तयाद्गुणेनिमित्तीकृत्यपश्चात्प्रवर्तमानेनैत्वेनांतरंगेणापिप्रथमप्रवृ

नस्यवहिरंगस्यवाधितुमशक्यत्वाद्बहिरंगस्यासिद्धत्वमंतरेणापिअंतरंगवलीयस्त्वमात्रेणादेशलक्षणप्रतिषेधान्निर्वा
हादेत्वप्रसंगोदुर्वारः॥किंचउपेयायउयोवापउपेयुतेप्रेयुतेअत्रकुमारीदंआशशस्त्रीदंधानाशष्कुलीदंयुगवरत्रार्थमि
क्रोशंवीदंनिर्वाणसीदंअतिखट्वार्थमित्यादिष्वेकादेशस्यांतादिवन्द्रावात्अभ्यासह्रस्वउपसर्गह्रस्वनुहतेःअत्रवा
र्थनद्याद्ह्रस्वःह्रस्वोनपुंसकेप्रातिपदिकस्यगोस्त्रियोरुपसर्जनस्येत्येतेविधयःप्राप्नुवंति।त्वन्मतेनाजानंतर्याश्रयणेपि
वहिरंगासिद्धत्वनिषेधेनांतरंगेह्रस्वत्वेकर्तव्येएकादेशस्यासिद्धत्वाभावात्।तथाद्ध्यत्रमध्वत्रकास्यत्रवाय्वर्थ-
मित्यत्रवहिरंगेयणिकर्तव्येअंतरंगःसंयोगांतलोपःसंयोगादिलोपश्चप्राप्नोतिपूर्वोक्तादेवहेतोः।यत्रैकारशरीत्वे
पुनर्वहिरंगलक्षणत्वात्सिद्धमुपसर्जनह्रस्वत्वेचनाभ्यस्तादीनांह्रस्वत्वेनवावहिरंगलक्षणत्वात्।वहिरंगलक्ष
णत्वादितिह्रस्वोनपुंसकेगोस्त्रियोरंतादिवच्चसंयोगांतस्यलोपइतिसूत्रेषुवार्तिकाचार्येणवहिरंगस्यासिद्धत्वेनैवप
रिहृतत्वाद्विरोधापत्तिः।यत्त्वंतरंगेज्ञानंतर्याश्रयणेवहिरंगासिद्धत्वनिषेधस्यस्वोपयादकत्वाभावान्नषत्वतुकोरसि
द्धिरितिशास्त्रारंभोसापकइतितन्न॥अंतरंगेषत्वेतुकिचाजानंतर्याश्रयणाभावेनवहिरंगस्यैकादेशस्यासिद्धत्वनिषे

धाभावात्वो ।सिचरधीसेस्याद्वैस्वविषयेतस्यफलवत्त्वापादकतयातदारंभोपपादकत्वाभावेप्यस्यदृष्टिसादृश्यफले
१५ नफलत्वापादनात्तस्यतदारंभोपपादकत्वोपपत्तेः ।संतिह्येवंजातीयकानिज्ञापकानिभाष्यकारेणोपन्यस्तानि ।।यथा
15 स्वंरूपमित्यत्ररूपग्रहणमर्थवद्ग्रहणेनानर्थकस्येतिपरिभाषायाज्ञापकं ।तत्रहिशब्दस्यस्वंसंज्ञाभवतीत्युच्यमानेप
द्यप्यग्न्यादेःशब्दस्याग्निशब्दत्वादिवदंगारादिकमप्यसाधारणेनात्मीयत्वात्स्वंतथापिप्रतीतानुपदेशानपेक्षत्वादं
तरंगत्वादहेयत्वादसाधारणत्वाच्चस्वशब्देनाग्निशब्दत्वादिकेरूपमेवगृह्यतेनत्वर्थइतिव्यावर्त्यभावेनानर्थक्याद
नुपपद्यमानंरूपग्रहणंप्रतीतानुपदेशापेक्षंचाहिरंगहेयसाधारणमप्यर्थस्वरूपंशब्दस्यस्वंशब्दग्रहणेषुस्वरूपतुल्य
कस्यतयागृह्यतइत्येतस्यार्थस्यार्थवद्ग्रहणेनानर्थकस्येतिपरिभाषाप्रतिपाद्यस्यसत्यप्यंतरंगत्वादिहेतौस्वरूपमि
त्यत्रस्वशब्देनाग्निशब्दत्वादितुल्ययोगक्षेमतयागृहीतुंयोग्यस्याप्यर्थस्यशब्दंप्रतिअज्ञातत्वेनवियोगासंभवा शिवः
त् ।।अर्थव्यावृत्तिसिद्धेःस्वविषयेफलमसंपादयतोपिकाशेकुशेइत्यत्रशेइतिप्रगृह्यसंज्ञानिवृत्तयेस्वरूपफलेनैव १५
फलवत्त्वापादनास्त्वारंभोपपादकस्यज्ञापकमितिसमर्थितंअतोमत्पक्षेपिनपत्वतुकोरसिद्धइतिशास्त्रारंभस्यज्ञा

पकत्वविरोधः॥ ॥इतिपंचमीकक्ष्या॥ ॥यदुक्तं स्योने स्याहाद्यंतरंगेत्वानंतर्याश्रयणेन वहिरंगासिद्धत्वनिषेधेपि लोक
सिद्धेनांतरंगबलीयस्त्वेन यणादेशो गुणं बाधत इति· तन्न। विप्रतिषेधसूत्रे भाष्यकारेणोभे तर्हि कर्तव्ये स्योने स्याह अन
येव सिद्धं परिभाषयाइहापि स्योने स्यादित्यंथेन वहिरंगस्य गुणस्यापि सिद्धत्वाद्वयणादेश सिद्धिमुक्त्वांतरंगे प्रयो
जनं यणादेशे त्वोत्वानिगुणे वृद्धि द्विर्वचनान्नोपस्वरेभ्य इत्यादि वार्तिके वकुप्रयोजननिर्वाहकत्वेन वार्तिककारेणोपन्य
स्तस्याप्यंतरंगबलीयस्त्वस्यत्तौ किकन्यायस्य वहिरंगासिद्धत्वमंतरेणायचावेदं पचामेदमित्यत्र प्रथमप्रवृत्तवहिरंग
विषयप्रयोजननिर्वाहकत्वाभावात्· पचावेदमित्याद्यर्थं वाहऊठित्यत्र ऊठ्विधानज्ञापितस्य प्रदर्शनं वहिरंगपरिभा
षयैव वार्तिककारेणोपन्यस्तत्वेन प्रयोजननिर्वाहकत्वाच्छास्त्रीयपरिभाषायामेवांगीकृत्य प्रयोजनाभावेन गौरवे
णाचलोकसिद्धन्यायाश्रयणेस्येह यणस्त्वेपरित्यक्तत्वात्· शास्त्रीयपरिभाषायाश्च निषिद्धत्वात्॥ परत्वाद्गुणप्रसं
गइतिस्योनः स्योने स्यादौ दोषस्तत्पक्षेपि दुर्वारः। कथं तर्हि वचः परस्मिन्पूर्वविधावित्यत्र भाष्यकारेण प्रसंगवतीला
कोलक्ष्यत इत्यादिग्रंथे लोकदृष्टांतोपन्यासेनांतरंगबलीयस्त्वं समर्थितमिति चेत्। शृणु तावन्न्यासंगेन तत्रस्थ

चः परस्मिन्पूर्वविधानमनारंभेपि पष्ठ्याम अध्यइत्यत्रासिद्धं बहिरंगमंतरंग इति परिभाषया नित्यस्यापि परयणादेशस्यासि
१६ द्धत्वात्पूर्वयणादेशस्यासन्निधानात् । कथं बहिरंगपरिभाषाप्रवृत्तिः कथं वा पूर्वापरोभययणादेशावद् असिद्धं बहिरंगमंतर
16 गे अनित्यान्नित्यं बलीयइति तपरिभाषया यान्नायसिद्धायाउपस्थितौ नित्यबलीयस्त्वमनादृत्य बहिरंगपरिभाषाप्रवर्त्तन
मित्याकांक्षायामावश्यं चैषा परिभाषाश्रयितव्या स्वरार्थमित्यादिग्रंथेन बहुप्रयोजनाचैषा परिभाषेति बहुशास्त्रे बहु
प्रयोजनसिद्धिं चोपन्यस्य नित्यबलीयस्त्वाद्बहिरंगपरिभाषासिद्धस्यांतरंगबलीयस्त्वस्य बलवत्त्वाश्रयणे नित्यादंतरंग
बलवद् इति परिभाषा परमित्यंतरंगप्रतिपदविधयइति परिभाषैकदेशभूता वश्यकर्त्तव्या सा च लोकतः सिद्धा ॥ अव
श्यकर्तव्यं श्वशुरादिसंबंधिकार्यकरणात्पूर्वमंतरंगं सुहृत्कार्यानुष्ठानस्य लोके दर्शनात् नित्यबलीयस्त्वाद्बहिरंगपरिभा
षासिद्धस्यांतरंगबलत्वस्यैव बलवत्त्वं लोकदृष्टं तेन शास्त्रेपि समर्थितं । ननु प्रथमं यद्याम् इत्यत्र लोकसिद्धांतरंगब शिवः
लपरत्वेन पूर्वयणादेशसिद्धिमुक्त्वा नित्यबलीयस्त्वस्य प्रतिपक्षशंकया नित्यादंतरंगबलीयस्त्वं समर्थितं ॥ तथा स १६
ति एतदपि नास्ति प्रयोजनं अत्र असिद्धं बहिरंगमंतरंग इत्यसिद्धत्वाद्बहिरंगस्य परयणादेशस्यांतरंगलक्षणः पूर्वयण

दोषो भविष्यतीति परिभाषानुपपत्तेः ॥ लोकसिद्धस्यांतरंगबलीयस्त्वे बहिरंगस्यासिद्धत्वाभावात्सिद्धस्यैव बहिरंगस्य
तत्रांतरंगेण बाधनात् बहिरंगासिद्धत्वस्य बाहुप्रसिद्धस्तत्र ज्ञापितशास्त्रीयपरिभाषायैकविषयत्वान्नित्यानित्यकार्यद्वयमा
त्रविषयस्य नित्यादंतरंगं बलीय इत्यस्य कार्यद्वयविषयेपि संभवतो बहिरंगादंतरंगादंतरंगं बलीय इति लोकदृष्टांतसमर्थि
तेन न्यायेन स्योनः स्योने साद्दैयणगुणयोरुभयोरनित्यत्वे न व्यवस्थित्यसिद्धेः ॥ शास्त्रीयपरिभाषानिषेधे त्वन्मतेपि
तत्र दोषो दुर्वार एव ॥ किंच त्वत्पक्षेपि रियति धियति पियति भ्रुवद्वत्तथा सुस्रुवदित्यत्र सार्वधातुकगुणात्परत्वाच्छ
तुरोः कृतयोरियङुवङोर्लघूपधगुणस्य च प्राप्तौ अंतरंगयोरियङुवङोरज्ञाने तयोश्रयणाद्बहिरंगासिद्धत्वान्नि
षेधे लोकन्यायस्य च परित्यागात्परत्वाद्गुणप्रसंगः तस्मादुभयसमाधेया बहवो दोषा ज्ञापकभूम्यनुरोधस्त्वमतस्पष्टे
विशेष इति ॥ ॥इति षष्ठीकस्या॥ ॥ यदुक्तं विप्रतिषेधसूत्रेप्यंतरंगबलीयस्त्वस्य लौकिकन्यायस्य भाष्यकारेण परि
त्यागादंतरंगे ज्ञाने तयोश्रयणे बहिरंगासिद्धत्वमभ्युपगच्छतस्तवापि मते स्योन ॥ स्योने साद्दे दोषो दुर्वार इति तन्न । अत्र
रूढाश्रयणोद्ध अश्वाशास्याद्वृत्त्या दोषस्य निमित्तलक्षणं तेरणविहन्यते न तदनित्यमिति न्यायादुभयोरपि नित्ययोर्गु

णसवर्णदीर्घत्वयोर्धातूपसर्गयोः कार्यमंतरंगमितिनाप्यृकुण स्यांतरंगत्वेपितत्रैवाजानंतर्याश्रयणान्नाजानंतर्य
१७ परिभाषयावहिरंगस्य सवर्णदीर्घस्यासिद्धत्वनिषेधेन परत्वात्पूर्वसवर्णदीर्घ पश्चादाकुणेनैव सिद्धे ओमाङोश्चेति
17 पररूपारंभादिदृशास्त्रे सूत्रकारेणैवांतरंगवलीयस्त्वस्यज्ञापनात् आकुणात्सवर्णदीर्घत्वमाङ्भ्यासयोरित्यादिना
अयंएवेस्याद्दोगुणात्परत्वाद्वृद्धिः· पूर्वसवर्णदीर्घमुक्त्वा स्वरदोषस्त्विति पूर्वदीर्घप्रवृत्तौ स्वरदोषमाद्रि· पररूपानर्थक्यं
चाशंक्याद्रि· पररूपवचनं च ज्ञापकमंतरंगवलीयस्त्वस्येति लोरोत्वमंतरंगं वहिरंगत्वस्य णा। छ्लविकारादिस्वंतरंगवली
यस्त्वाश्रयणस्य वार्तिककारैः कृकतिपयप्रयोजनदूषणानंतरं हृस्वा अत्र समुस्वा अत्रे सुदाहरणे वहिरंगमतोरोरस्तु
तादिति उत्वं वाधित्वा प्रथमयोः पूर्वसवर्णइति पूर्वसवर्णसिद्धप्रयोजनमुपन्यस्य न चावश्यमिदमेव प्रयोजनं अद्ययो
गेवहूनि प्रयोजनानि तदर्थमेषा परिभाषाकर्तव्याप्रतिविधेयं दोषाश्चिति भाष्यकारेण विप्रतिषेधसूत्रोपन्यस्ताद्याने शिवः
कप्रयोजनसिध्यर्थं तत्रैवोपन्यस्तकतिपयदोषसद्भावेपि दोषप्रतिविधानपूर्वकांतरंगवलीयस्त्वस्यावश्याश्रय १७
त्वव्यवस्थापनाद्वानचतत्रापितदर्थमेषा परिभाषाकर्तव्येति परिभाषाशब्देन व्यवहाराद्वहिरंगासिद्धं तत्परिभाषये

वविप्रतिषेधसूत्रे उपन्यस्तानेकप्रयोजनसिध्यर्थस्यापितेति वाच्यं वहिरंगपरिभाषा वाहऊठिसूत्रज्ञापितत्वेन ओमाङो
श्चेत्यत्र ज्ञापकांतरानपेक्षणात् त्वन्मतेनापि यत्र वहिरंगासिद्धत्वं नाज्ञानंतर्य इति प्रतिषिद्धं ह्रस्वात्रत्र ह्रसात्रत्रैतिता
दृग्प्रयोजननिर्वहिर्थं तेनोपन्यस्यमानस्य त्रोमाङश्चेति ज्ञापितस्यांतरंगवलीयस्त्वस्य प्रकृतत्वात् । तस्य च वहिरंगासि
द्धत्वपरिभाषात्वायोगात् ॥ वहिरंगासिद्धत्वस्यांतरंगवलीयस्त्वस्य च पचावेदमित्याशेफलभेदेन चैक्यानुपपत्तेश्च
विप्रतिषेधसूत्रेंतरंगवलीयस्त्वस्यानेकप्रयोजनोपन्यासानंतरं एतान्यस्याः परिभाषायाः प्रयोजनानीति तत्रापि
परिभाषाशब्ददर्शनाच्चातस्माद्दृष्टप्रमाणविरोधाद्विप्रतिषेधसूत्रे उभेतर्हि कर्त्तव्ये नेत्याहान्त्र नयैव सिद्धं परिभा
षयाइहापि स्योनः स्योनेत्यत्रांतरंगवलीयस्त्वाश्रयणनिराकरणपरं भाष्यकारवचनं वार्त्तिककारोपन्यस्तांतरं
गवलीयस्त्वेन सकलप्रयोजननिर्वाहाभावादूठ्विधानज्ञापितस्योपन्यस्तवहिरंगासिद्धत्वपरिभाषाया अवश्याश्रय
णीयत्वोपन्यासोपयोगितयास्त्वत्यर्थं वार्त्तिककारोपन्यस्तस्योनादिसकलप्रयोजननिर्वाहयोग्यताशालित्वमात्रप्र
तिपादनपरमिति नेतव्यं ॥ अन्यथातन्त्रे व वहिरंगासिद्धत्वस्याश्रयपूरिस्यत्रास्तिव्यावत्सुपन्यासानंतरं तत्परिजिही

र्षणानाजानंतर्यइतिपरिभाषाश्रयणानुपपत्तिः॥अक्षद्यूरित्यत्रांतरंगेयणएव जानंतर्याश्रयणेचस्यो नइत्यत्राप्यंतरंग
१८ स्याजानंतर्याश्रयस्यसत्वात्।अंतरंगवहिरंगयोर्यत्र क्वचिद्जानंतर्याश्रयणेवहिरंगासिद्धत्वमभ्युपगच्छतस्तवापिस्यो
18 नादिरूपसिद्ध्येएवमेवकल्पनीयत्वात्।तस्मादंतरंगवलीयस्त्वस्यशास्त्रपरित्यक्तुमवश्यत्वात्॥स्योनस्योनेसादे
शचङं.तेचमत्यसेनकश्चिद्दोष॥त्वत्ससेत्कारीत्यास्योनादौशचङं.तेचद्दोषपरिहारोपिपचावेदमित्यादौदोषोदुष्परि
हरइति।एतेनेदं निरस्तं।नधातुलोपइतिसूत्रेयत्रकार्यविधावचोरानं॰तयर्णश्रयणंतत्रनिषेधादनुपस्थानेपरि
भाषायायथा अक्षद्यूरित्यादिवाकेकार्यविधावितिविशेषणात्कर्तव्यत्वेनोपस्थितेविधावचोरानंतर्याश्रयणेवहि
रंगासिद्धत्वंतरंगइतिविशेषः साक्षादश्रवणात्तत्रांतरंगवहिरंगोचोपपद्यते।एवंचोपेद्धइत्यत्रगुणशास्त्रहत्तिपूर्वे
कत्वान्निषेधशास्त्रप्रवृत्तिस्तत्रैवकर्तव्यत्वोपस्थितिपर्यवसानात्॥तत्रनाजानंतर्याश्रयणाभावेनासिद्धत्वनिषेधाभा शिवः
वोपन्यासश्चसंगच्छते॥अदसोमादित्यत्राप्यमी अत्रेत्यादावीत्वादीनामयादीनांचगुणपत्वप्रहजावपिअयाद्विषुअ १८
जानंतर्याश्रयणेनकर्तव्यत्वेनोपस्थितेविधावचोनंतर्याश्रयणानुपायात्॥तत्रवहिरंगासिद्धत्वनिषेधेनायादिप्रसंगेन

समर्थनंचकैयटकृतंसंगच्छतइतिनधातुलोपइतिसूत्रेअरुःसोमादितिसूत्रेचनक्वापिभाष्यवार्त्तिकयोरेषुविरोधः।
यत्तावदस्मिन्पारावभ्यासोह्यावाधनदीनपुंसकोपसर्जनह्रस्वत्वविधौच एकादेशप्रवृत्त्युत्तरकालमेवणतेएत्वस्यह्रस्व
स्यचप्रवृत्त्याकर्तव्यत्वेनोप।स्थितेस्तत्राजानंतर्याश्रयणंतत्रबहिरंगासिद्धत्वनिषेधइतिकैयटाशयानुरोधेनाभ्युपग
तेमत्यस्तेतावन्नक्वापिशास्त्रेदोषइतिस्योनस्योनेस्यादौवियतीत्यादौशाचटुं।तेचयणियङुवङांगुणस्यचयुगपत्प्र
सक्तौकर्तव्यत्वेनोपस्थितेयण्गौअजानंतर्याश्रयणसत्वेनतत्रबहिरंगासिद्धत्वनिषेधप्रसंगतादवस्थ्यात्।बहिरंग
परिभाषातिरिक्तस्यांतरंगबलीयस्त्वन्यायस्यशास्त्रत्वानभ्युपगमाच्चकर्तव्यत्वेनोपस्थितेषत्वेतुकिंचाचोरानंतर्यश्रि
यत्वेनज्ञापकभ्रमानुसरणस्यत्वस्यस्वेपितुल्यत्वाच्चानुपपन्नएवत्वस्येइति॥इतिसप्तमीकल्या॥यत्तुनेषट्श्रुतांत
रंगबलीयस्त्वसमाश्रयणपरानेकप्रमाणविरोधाद्विप्रतिषेधसूत्रश्रुतमंतरंगबलीयस्त्वसमाश्रयणनिराकरणपरंव
चनमन्यथानेतव्यमित्तितरनुपपन्नं॥प्रथमचरमश्रुतप्रमाणद्वयविरोधेप्रथमश्रुतप्रमाणस्यानुपजातविरोधित्वे
नप्राबल्यात्तदनुरोधेनैवचरमश्रुतप्रमाणस्यनेतव्यत्वात्॥तथाहि।विप्रतिषेधसूत्रेश्रुतमंतरंगबलीयस्त्वाश्रयण

निराकरणपरंचचनंमनुपजातविरोधित्वेनस्वार्थोल्लंघनेकारणाभावात्स्वार्थमेवोपस्थापयति॥ संप्रसारणाच्चेत्यस्य

१९ त्रतुस्थलंअंतरंगवल्लीयस्त्वसमाश्रयणपरंवचनंतन्निराकरणेप्रथमश्रुतप्रमाणोपस्थितेबुद्धिस्थ्यसत्तितद्विरोधात्

19 तत्समाश्रयणमुपस्थापयितुंनेष्टं॥ येनचरमश्रुतप्रमाणोपस्थितविरोधात्प्रथमश्रुतप्रमाणस्यस्वार्थोल्लंघनेनबहि

रंगासिद्धत्वपरिभाषास्तत्व्यर्थताभवेत्॥ अतएवलोकेपिनस्मादुच्चैस्तेचाक्रियतउपांशुयजुषाउच्चैःसामेतिवाक्ये

संवादवधायावेदेधमंत्रगीतिविशेषवाचिनामृगादिपदानांस्वार्थविस्थापकत्वेतेभ्यस्तत्पानेभ्यस्त्रयोवेदाअये

हेवायोर्यजुर्वेदः आदित्यात्सामवेदइत्युपक्रमगतार्थवादश्रुतेनमंत्रब्राह्मणसमुदायात्मककाठकादिग्रंथविशेष

वाचकेनासंजातप्रतिपक्षत्वान्निरंकुशायुपस्थापितस्वार्थेनिवेदंपदेनवेदानभिष्टुत्यक्रमादीनामुच्चैःस्वरादिगुणवि

धानेस्त्वविधानयोरन्वयाभावेनैकवाक्यतासंभवात्॥ उभयोरेकत्वावश्यंभावेनप्रथममुपस्थितस्वार्थवेदपदावि शिवः

रोधायस्वार्थमुल्लंघ्यऋगादिपदानांलक्षणयातत्तद्वेदोपस्थापकत्वात्॥ यदृग्वेदेनक्रियतेतदुच्चैरित्यादिप्रकारेण १९

ऋग्वेदादिविहितकर्मवृंदस्योच्चैस्त्वादिकंकर्तव्यतयाप्रतीयेत॥ नचतत्रऋगादिपदानांस्वार्थोपस्थानेप्रथमोपस्थि

तवेदपदार्थविरोधेनप्रतीतैकवाक्यताभंगभियास्वार्थोल्लंघनमस्तु॥इहत्वनेकप्रकरणव्यवहितयोरिहशास्त्रेऽन्तरं
गवल्लीयस्त्वाश्रयणपरवाक्यस्य चरमश्रुतस्यापिस्वार्थोपस्थापकत्वसंभवात् चरमश्रुतोपस्थापितस्वार्थेनैकप्रमा
णविरोधात्प्रथमश्रुतस्याव्यवस्थापनं स्यादितिवाच्यं॥अनेकप्रकरणव्यवहितयोरप्यनयोरेकार्थत्वेनैकवाक्य
तासंभवात्॥अर्थैकत्वादेकं वाक्यमितिन्यायात्॥यस्ययेनार्थसंबंधो दूरस्थेनापितेनसः॥अर्थतो ह्यसमर्थानामानंत
र्यमकारणमित्यभियुक्तोक्तेश्च॥ड्याप्प्रातिपदिकादितिसूत्रेण एकं वाक्यं तच्चेदं च यद्येकं वाक्यं किमर्थं नानादेशस्थं क्रियतइ
तियेन भाष्यकारेणाप्यनेकप्रकरणव्यवहितानामपि कर्मणि द्वितीयाबहुवचनमित्यादीनां स्वादिराविधायवाक्येनैका
ह्यावशादेकवाक्यतासमर्थनाच्च॥तस्माच्चरमश्रुतस्यांतरंगवल्लीयस्त्वाश्रयणपरस्य ग्रंथस्य प्रथमश्रुतेस्यैकवाक्यता
पन्ननिराकरणपरग्रंथविरोधेनस्वार्थोपस्थापकत्वाभावात्॥तद्विरोधेनप्रथमश्रुतवाक्यस्यान्यथानयनं युक्तिमत्॥अ
तोंतरंगवल्लीयस्त्वाश्रयणनिषेधात्स्यानेत्याहोत्वसप्रसंगोबाधुर्वेरइति॥ ॥इतिसप्तमी॥ ॥उभेतर्हिकर्तव्येनेत्याहेऽति
प्रथमश्रुतवाक्यस्यावश्यमेषापरिभाषाकर्तव्येति चरमश्रुतवाक्यस्यचषोडशिग्रहणवाक्यवन्न्यायप्रतिपादकत्वे

नसर्वथाचविरोधादेकवाक्यतासंभवेनपूर्ववृत्तिमगणय्यैवोपस्थापितस्वार्थंचरमश्रुतानेकप्रमाणविरोधात्त्यजमश्रुत
२० स्यापि। अंतरंगवलीयस्त्वनिराकरणस्यस्ववैक्तिप्रकारेणान्यथानयनंयुक्तं॥नचषोडशिग्रहवदेवांतरंगवलीयस्त्वाश्र
20 णस्यविकल्पएवस्यात्।नपूर्ववाक्यस्यान्यथानयनमितिवाच्यं।तन्निराकरणस्यबहिरंगासिद्धत्वपरिभाषातिरिक्तार्थ
तयोपपत्तौअसद्दोषदुष्टकल्पनस्यगौरवत्वेनाश्रयितुमशक्यत्वात्॥उभयोरेकवाक्यत्वेपिअल्पप्रमाणाद्युपक्रमा
त्तदनुप्रमाणस्योपसंहारस्यैवप्राबल्यात्तदनुरोधेनैवोपक्रमस्यनेतव्यत्वात्तथाहिउपक्रमेकस्मिंश्चिद्वैकेनचित्प्रमा
णेनोपस्थापितेसतितदेकवाक्यतापन्नेप्युपसंहारगतमेकमेवप्रमाणंपूर्वप्रतीताविरोधेनस्वार्थमुपजनयत्यान्वयबोधमा
दधातिनानेकंबहूनांस्वार्थपरित्यागस्यानुत्पत्तिविरुद्धत्वात्तादृशमुपसंहारगतानेकप्रमाणंतुपूर्वप्रतीतिविरोधमनु
संधीयमानमुपक्रमगमपिस्वविरुद्धेर्थेव्यवस्थाप्यैवान्वयबोधमादधाति॥अतएवऐंद्राग्नएकादशकपालःप्राजापत्य शिवः
दधिमधुघृतमायइत्यत्रपंचानांहविषांआद्ययोरैंद्राग्नसान्नाय्यविकारत्वेनामावास्याविधंतरप्राप्तावप्युपांशुयाज २०
विकाराणांमधूदकघृतानामपिचरमश्रुतानांभूयस्त्वात्तयोरपौर्णमासविध्यंतप्रतीतिः॥एवंचरमश्रुतानेकप्रमाणावि

रोधात्पूर्वं श्रुतत्वं यस्यान्यथानयनात्तदंतरंगावलीयस्त्वाश्रयणमप्रत्यूहमिति नैवस्योनेस्याद्दैयणादिसिद्धेर्मतस्येतावान
दोषः॥ तत्त्यस्येतुपचावेदमित्यादौ दोषो दुष्परिहर इति॥ ॥इति नवमी कस्या॥ ॥यदुक्तमोमाङोश्चेतिसूत्रकारेण ज्ञापितं सं
प्रसारणाच्चेतिसूत्रे आङ्गिः पररूपवचनं तु ज्ञापकमंतरंगवलीयस्त्वस्येति नावश्यमिदमेव प्रयोजनं आद्येयोगे च बहूनि प्रयो
जनानि तत्प्रमेषा परिभाषा कर्तव्येति तत्रैव सूत्रे विप्रतिषेधसूत्रे पुनस्तानेकप्रयोजनसिध्यर्थमिह शास्त्रे समाश्रयणीयते
न भाष्यकारेणापि समर्थितमिति विप्रतिषेधसूत्रे पूर्वं निराकृतस्य पुनः किं प्रयोजनमुद्दिश्य समर्थनमित्येतद्विवेचनीयं॥ नता
वद्यत्रांतरंगबहिरंगयोरज्ञानेतयोश्रयणं भावः यथा स्योनस्योनेस्यत्रैव वृद्धादेशघूपधगुणयोस्तदर्थमितिशक्यं वक्तुं तत्र
वहिरंगस्य गुणस्यासिद्धत्वादेवोढ़सिद्धेः॥ नापि यत्र वहिरंगमाने नाजानंतर्योश्रयणेवानीयमित्यादौ आत्वायादेशयोस्तत्रा
पित्वन्मते वहिरंगासिद्धत्वेनैव सिद्धेः॥ अंतरंगमात्रे अज्ञानंतर्योश्रयणात्रियतिपियतिधियतिमाङ्गुत्वत्प्रासुरत्ववदित्या
दौ इयङ्कुणयोरुवङ्गुणयोश्चांतरंगमात्रे ज्ञानंतर्योश्रयणं यत्र चांतरंगबहिरंगयोरज्ञानंतर्योश्रयणं यथा अयजइंद्र
स्याइंद्रइंद्रमित्यत्र वाक्यसंस्कारपक्षे विभज्यान्वाख्याने आङ्गुणसवर्णदीर्घयोरुभयत्राजानंतर्याश्रयणे तत्र वहिरंगासि

ङ्त्वनिनिषेधात्तदर्थमंतरंगवलीयस्त्वसमर्थनमिति चेत्॥ तर्हि केऽपि चेत्सूत्रांतरंगवलीयस्त्वं परित्यज्य बहिरंगपरिभाष
२१ याश्रियतीत्याह॥ विपट्टः समर्थनानुपपत्तिः॥ तथैवाचः परस्मिन्पूर्वविधावित्यत्राप्रद्यामृद्येत्यत्र असिद्धं बहिरंगमंतरंगइ
21 तिपूर्वयणादेशानुपपत्तिः॥ तथैवाचाङ्कुणइत्यत्रापि स्सइदं स्मिसहो बहिरंगासिद्धत्वेनैवाङ्कुणसमर्थनानुपपत्तिः॥ तस्मा
त्संप्रसारणाच्चेत्यत्रांतरंगवलीयस्त्वाश्रयणपरस्य ग्रंथस्य चरमश्रुतस्यैव स्वप्रतिपक्षप्रथमश्रुतानेकप्रमाणविरोधाद
न्यथानयनं युक्तं॥ वस्तुतस्त्वंतरंगे चेति वार्तिककारेण पनस्यमानमंतरंगवलीयस्त्वमपि लौकिकमंतरंगतरंगवलीय
स्त्वमात्रं किंतु बहिरंगशास्त्रासिद्धत्वापादकलक्षणमेतच्छास्त्रासाधारणविलक्षणमेव वलीयस्त्वं अन्यथा ह्रस्वो नपुंस
के प्रातिपदिकस्य गोस्त्रियोरुपसर्जनस्येत्यत्र युगवरत्राय्यातिखट्वायेत्यादौ यकादेशदीर्घत्वेषु नपुंसकोपसर्जनह्रस्वत्व
प्राप्तौ तत्प्रतिषेधं चोदयित्वा अन्यत्रैकादेशदीर्घत्वेषु बहिरंगलक्षणत्वात् सिद्धं उपसर्जनह्रस्वत्वे चेति बहिरंगलक्षण शिवः
त्वादतिखट्वायेत्यादिसिध्युपन्यासानुपपत्तेः॥ न तर्हि यत्र यत्रैकादेशदीर्घत्वेषु कृतेषु प्राप्नुवतो नपुंसकोपसर्जनह्रस्व २१
त्वस्य बहिरंगशास्त्रासिद्धत्वं विना विप्रतिषेधसूत्रेऽइह शास्त्रे समाश्रयणायत्वनस्तोपन्यस्तादंतरंगमात्रान्निवृत्तिः सिध्य

त्तितेन हि समकालप्रवृत्तयोरंतरंगवहिरंगयोर्वहिरंगप्रतिवंधांतरंगप्रवृत्तिमात्रं सिध्येत ॥ नतु वहिरंगवशात्स्वासिद्धत्वम

पि। तथा घटेऽत्रंतादिवच्चेत्यत्रापि उपेयाजउपोवापेसादौ एकादेशे कृते एकादेशस्यांतादिवत्त्वाद्भ्यासोहावार्थनदीनपुं

सकोपसर्जनकृस्वत्वप्रसंगादंतादिनिषेधाचोद्यत्वानवावहिरंगलक्षणादितिसमाधानानुपपत्तिश्च ॥ तच्च लक्षणमंतर

गवल्लीयस्त्वमुपन्यस्यमानमाङि·पररूपमारभ्यमाणस्य सूत्रकारस्याशयेस्थितइतिज्ञात्वैवोपन्यस्यते ॥ अन्यथा तादृशस्या

पूर्वस्यांतरंगवल्लीयस्त्वस्यांतरंगवल्लीयइति उपसंख्यानमिस्तुय संख्यातत्वापत्तेः ॥ तादृशस्यवांतरंगवल्लीयस्त्वस्य सूत्रकारा

शयस्थितत्वपरिज्ञानेवार्त्तिककारस्याङि·पररूपारंभादित्येव कल्प्यं ॥ आङि·पररूपवचनंतुज्ञापकंमंतरंगवल्लीयस्त्वस्य

तिस्वयमेवोपन्यासदर्शनाच्च ॥ वार्त्तिककारंप्रतिवाहऊठितिवचनस्यज्ञापकत्वकल्पनेप्रमाणाभावाच्च ॥ ऊठ्वचनानर्थ

कंसंप्रसारणेनकृतत्वाद्गुणप्रसुपलक्षणत्वाद्वै जनहणाद्वृद्धिरितिवार्त्तिककारेणसर्वथैवोठ्विधानस्यप्रत्याख्यातत्वा

त ॥ उठ्विधानंवार्तिककारस्यवहिरंगासिद्धत्वस्य सूत्रकाराशयस्थितत्वाज्ञानेहि अस्मान्प्रत्यपिज्ञापकत्वेनोपन्यसनी

यत्वात ॥ सर्वथैवप्रत्याख्यानानुपपत्तेः एवमुक्तप्रमाणवलाद्धिप्रतिषेधसूत्रेसंप्रसारणाच्चेत्यत्र च वार्त्तिककारेणोपन्यस्य

मानसंतरंगवल्लीयस्त्वंवहिरंगासिद्धत्वापादकत्वलक्षणमेव॥भाष्यकारेणनुअंतरंगंचेत्यत्रभवंतीत्यध्याहारेण।
२२ अंतरंगंधवंतीत्यस्यप्रतीत्यायथाविप्रतिषेधेपूर्वंबाधित्वापरंभवतितथाविप्रतिषेधेपरंपूर्वंवा॥वहिरंगंबाधित्वांत
22 रंगंचभवतीत्यंतरंगवल्लीयस्त्वमात्रंप्रतीयते॥तथाचकतिपयप्रयोजननिर्वाहायपचावेदमित्यादौप्रथमप्रवृत्तवहि
रंगासिद्धत्वाल्लाभात्॥तांतरंगवल्लीयत्त्वमात्रमंतरंगेचेत्यस्यविवक्षितंकिंतुवहिरंगशास्त्रासिद्धत्वापादकत्वलक्षण
मेववल्लीयस्त्वंविवक्षितमित्यन्यएवार्थोविप्रतिषेधसूत्रेयद्दर्शितप्रयोजनानिइत्यादिग्रंथेनाक्षेपंसमाधानभंग्या
प्रदर्शितः तस्मादंतरंगवल्लीयस्त्वस्यकापीहशास्त्रेउपक्षेपः।विप्रतिषेधसूत्रभ्रमप्रसक्तस्यनिराकरणमात्रंकृतं॥अं
तांतरंगवल्लीयस्त्वेनस्योनादौपरिहर्तुमशक्यत्वात्॥त्वत्पक्षेनुदोषोदुष्परिहरएव·मत्पक्षेतुज्ञापकं नूम्प्नुसेधोविशे
षइति॥ ॥इतिदशमीकक्ष्या॥ ॥अंतरंगएवजानंतर्याश्रयेणवहिरंगासिद्धत्वनिषेधः॥नचैवंस्योनःस्योनेत्यादौयणेक शिवः
त्वेगुणस्यासिद्धत्वनिषेधात्प्रसंगः।अंतरंगेजानंतर्याश्रयणेप्रथमप्रवृत्तवहिरंगासिद्धत्वनिषेधाभ्युपगमात्पचावेद २२
मित्यादौवहिरंगशास्त्रस्यप्रथमप्रवृत्तत्वेपिअंतरंगेजानंतर्याश्रयणाभावान्नासिद्धत्वनिषेधः॥स्योनःस्योनेत्यत्रापिअं

तरंगेयणपजानंतर्याश्रयणेपिगुणशास्त्रस्यप्रथमप्रवृत्तत्वाभावादसिद्धत्वनिषेधाभावइति॥ असद्यूपित्वादौतुप्रथमप्रवृत्त
सूत्रंनिमित्तीकृत्यप्रवर्त्तमानेयणपंतरंगेनानंतर्याश्रयणाद्बहोसिद्धत्वनिषेधइतिनकोपिदोषः॥ स्योनेत्सत्रद्धदूगुणयोर्वहिरं
गत्वाविशेषेपिअंतरंगेयणिकृतेअयगुणस्यसिद्धत्वेनतुकूवैषम्यस्यान्यथोपपादयितुमशक्यत्वात्॥ षत्वतुकोरसिद्धइत्य
त्रापिप्रथमप्रवृत्तवहिरंगासिद्धत्वस्यैववहिरंगपरिभाषासिद्धस्यारंभेणतदनुरोधेन — — इशावहिरंगासिद्धत्वनिषेधस्यैव
ज्ञापनमितिति॥ ॥इत्यैतावादशीकस्या॥ ॥भवेदेवंयद्यंतरंगेचोरानंतर्याश्रयणेप्रथमप्रवृत्तवहिरंगासिद्धत्वनिषेधःप्रामाणि
कोभवेत्॥ अस्यहिनषत्वतुकोरसिद्धइतिशास्त्रारंभोज्ञापकोभवितुमर्हति॥ ज्ञापकंहि॥ स्वस्यानुपपत्तिः॥ येनचस्वस्योपप
त्तिस्तदर्थंज्ञापयति अन्यथातिप्रसंगात्॥ यथाशतवर्षजीविनेदिवदत्तस्यगृहसत्वंवहिःसत्वंविनानुपपद्यमानंवहिःसत्व
मेवकल्पयतिनगृहलवकुत्रचित्कोणेसत्वंतेनवहि॥ सत्वेनगृहासत्वोपपत्तेःकोणसत्वस्यगृहासत्वोपपादकत्वाभावाच्च॥
यथावाधूमोवह्निमात्रंकल्पयतिनत्वयःपिंडसंक्रांतवह्निंएवमिहापियत्वतुकोरसिद्धत्वारंभः अजानांतर्याश्रयणेवहिरंगा
सिद्धत्वनिषेधस्यैवकल्पकःनतुत्वदुक्तार्थस्य॥ अंतरंगेअचोरानंतर्याश्रयणेप्रथमरत्तवहिरंगासिद्धत्वनिषेधंविनापि

अजानंतर्याश्रयणे वहिरंगासिद्धत्वनिषेधेनैव षत्वतुँग्धकोर सिद्ध इति शास्त्रारंभोपपत्तेः सत्यपि तस्मिन्को सिन्वहि
२३ स्यादेर्वहिरंगासिद्धत्वारंभः को सिचद्दित्यादौ स्वविषयसतोरसिद्धत्वमप्रतिवध्नतोर्थस्य न ज्ञापकः। अथ यत्तु अस्य चूरिसा
23 देर्यणादेशसिध्यास्वफलेनैव फलवत्त्वापादनात् तदारंभोपपादकत्वमिति तदपि न॥ तर्हि षत्वतुकोरेकादेशासिद्धत्वविधा
नेन ज्ञापितमेवांतरंगे जानंतर्याश्रयणे प्रथममप्रवृत्तवहिरंगासिद्धत्वनिषेधः अस्य घूरित्यत्र यणादेशं साधयतीति
पारंपर्येण तस्य फलवत्त्वमस्तीति वाच्यं। अन्योन्याश्रयात् ज्ञापितत्वसिद्धौ पारंपर्येण फलवत्त्वापादनाद् आरंभोपपादकत्वसि
द्धिः आरंभोपपादकत्वसिद्धौ तदुपपादकस्यातज्ज्ञापितत्वसिद्धिरिति॥ अजानंर्याश्रयणमात्रे वहिरंगासिद्धत्वस्यान्यतः
सिद्धिप्रतिवंधकत्वेनानर्थकानिरासात् तदारंभोपपादकत्वसिद्धौ वैषम्यस्यस्फुटत्वात्॥ त — — दनुपपन्नेषा वाचो युक्ति
र्यत्स्य फलेनैव फलवत्त्वापादनेनारंभोपपादकत्वात्तस्य ज्ञापकं — — देशस्यासिद्धत्वविधानमिति॥ यत्तु स्वं रूपमित्य
त्र स्वविषये फलं संपाद्यतो पार्थवद्ग्रहण — — भावार्थस्य रूपग्रहणं ज्ञापकमित्युक्तं तदपि न तत्र हि आप्तीयवचन २३
त्वेन स्वरूपवाच्यार्थसाधारणस्यापि शब्दस्यांतरंगत्वादिहेतुभिः स्वरूपमात्रपरत्वसिद्धौ अर्थमात्रस्यार्थक्रियमा

णंरूपग्रहणमनर्थकंसमशब्दस्वरूपग्रहणेतुसत्यप्यंतरंगत्वादिहेतौतुल्यबलस्यतत्यातदर्थोपिग्रह्यतइत्यर्थंविना
नर्थक्यपारनुपपद्यमानंतस्यार्थस्यज्ञापकमित्युच्यतेसचार्थेत्वशब्दस्यसाधारणीकरणसमर्थत्वात्विषयेफलसं
पादनसमर्थएव॥ अथतत्रएकाच्प्रत्ययइत्येकग्रहणंज्ञापकत्वंचिंसंअर्थस्यसंशब्दंप्रतिसंज्ञात्वेनविनियोक्तुम
शक्यत्वात्पुनरप्यानर्थक्यप्रतीतावपियेनांतरंगादिहेतुनापूर्वस्यस्यानर्थक्यंप्रतीतंतन्निरसनसमर्थंज्ञापयेदेवेति
नतावतातस्यज्ञापकत्वहानिःपुनरपिहेत्वंतरेणचेन्नतदानर्थक्यंप्रतीतंतन्निरसनक्षममतिस्तन्निरसनसमर्थमप्यर्थंज्ञा
पयत्येव॥ यथानदि॰संबुध्धोरितिहेनलोपःनिषेधस्यआंईचर्मन्नित्यादेसुपोलुप्तत्वेनयदाभावान्नलोपाप्राप्तावा
नर्थक्यप्रतीतौप्रत्ययलक्षणेनपदसंज्ञाज्ञापकःअसस्ययइतिप्रातिपदिकसंज्ञानिषेधाभावस्यचपुनःप्रत्ययलक्ष
णेनैवभसंज्ञयापदत्वनिवृत्तावानर्थक्यप्रतीतौप्रत्ययलक्षणेनभसंज्ञाभावस्यापिज्ञापकएवमिहापियेनयेनहे
तुनारूपग्रहणस्यानर्थक्यंप्रतीतंतन्नन्निरसमर्थमर्थंज्ञापयत्येवेतिनतावतातस्यज्ञापकत्वहानिः।किंतुद्वितीयज्ञा
पनफलस्यानुपयोगान्नोपन्यस्यते॥यद्वारथाद्यादिसादेरथरूपंयस्यरथशब्दस्ययस्यचारथशब्दशब्दस्यवाच्यंत

रुभयोरपि संज्ञामावि — — ति रूपग्रहणं ॥ प्रकृते पत्वतुकोरसिद्ध इति वचनस्य यथा वहिरंगपरिभाषया को सि — — स्या दे
२४ वसिद्धत्वसिद्धत्वानर्थकं प्रतीतं तस्या स्त्वयाकरण्य मानो नाजनंतर्यपरिभाषार्थं ग्रंथे — — निरसस्तु मोन भवतिइति
24 कथं ज्ञाप्यते ॥ तन्नाजानंतर्यपरिभाषा यां ज्ञापकत्वेन भाष्य — — — यन्मत्त षत्वतुकोरसिद्धत्वारंभस्यन त्व दुक्तार्थस्य
ज्ञापकइति ना सोपरिभाषार्थ इति ॥ ॥ इति द्वादशी कण्या ॥ येन वहिरंगशास्त्रेण निवर्तिनमचमानंतर्येण व्यवधा
नेन निमित्तीकृत्य यदं तरंगशास्त्रं प्रवर्तते तत्र कर्त्तव्ये वहिरंगं नासिद्धमिति परिभाषार्थः । एवं चादेशप्रत्यययोरित्यत्रइ
ए कोरिति पंचमी निर्देशात्तस्मादित्युत्तरस्येत्यत्र निर्दिष्टग्रहणस्यानंतर्यार्थत्वात्को सि वदित्यादौ वहिरंगशास्त्र निरु
त्तमचं आनंतर्येय निमित्तत्वेनाश्रित्य षत्वशास्त्रे कर्त्तव्ये वहिरंगासिद्धत्व निषेधात्स्वविषये फलवत्वापादनेन रतद्दा
रंभोयपाद्का वा त्र षत्वतुकोरसिद्धत्वारंभस्य ज्ञापकत्वविरोधः अक्षद्यूरित्यादावपि वहिरंगशास्त्र निवृत्त मूत्वादे
शं इकोयणचीति सप्तमी निर्देशादानंतर्यमाश्रित्य यणि कर्तव्ये वहिरंगासिद्धत्वनिषेधसिद्धिः ॥ स्योनः स्योनेत्यादाव २४
पियत्र यथांतरंगवहिरंगयोः समकालमप्रवृत्तित्वत्र वहिरंगशास्त्रनिर्वृतस्याचन्त्रानंतर्येणाश्रयणात् वहिरंगासि

द्धत्वनिषेधाभावः ॥ पचावेदमित्यादावेतरेत्वे अभ्यासेहावार्यनदीनपुंसकोपसर्जनह्रस्वत्वेषु च वहिरंगशास्त्रनिवृत्त
स्याचः कार्यित्वात् आनंतर्यमप्यणत् असिद्धत्वनिषेधाभावः समंजस इति ॥ ॥ इति त्रयोदशी कक्ष्या ॥ ॥ स्यादेतत्
षत्वसिद्धत्वारंभस्य तत्वतुक्कार्थज्ञापकतायामपि तुक्सिद्धत्वारंभो न तत्वतुक्कार्थज्ञापकः ह्रस्वस्यापिति कृति तुगित्यत्र पंच
मीनिर्देशस्य सप्तमीनिर्देशस्य वा भावात् ॥ अधीत्येत्यादौ वहिरंगशास्त्रनिवृत्तस्याचः स्थानिवुध्या कार्यत्वेनैवाश्रय
णात् ॥ वहिरंगा — — वनिषेधाभावेन तु किं असिद्धत्वारंभवैयर्थ्यस्य तत्त्वस्सत्वेन तत्स्वारंभोपपादकत्वाभावा — — न च
उरित्यत्रवेत्रः क्विपि संप्रसारणे परपूर्वत्वे च ह्रस्वस्यापिति कृति तुगिति क्विनिमित्ते वहि — — — रंतरंगस्य परपूर्वस्या
वहिरंगपरिभाषया सिद्धत्वलाभात्तन्मतेपि तुक्यसिद्धत्वारंभस्य — — — र्थत्वेन ज्ञापकत्वायोग इति वाच्यं ॥ तत्र शाक
टूपुपरिचीब्धित्याद्यर्थमाश्रितेन संप्रसारणङीङूःसुसिद्धत्वमिति वार्तिकेन परपूर्वत्वस्य सिद्धत्वनिषेधात् अदित्येव तु
काभवितव्यत्वात् संप्रसारणङीङुः सप्रतिषेधमनाश्रित्य शाकटूब्धित्याद्यर्थपरांतपदोऽदादेरेकादेशस्यासिद्धत्वव्यव
स्थापनेपि एकः पूर्वपरयोरित्यतः पूर्वपरग्रहणमंतादिवच्चेत्यंतादिग्रहणमनुवर्त्य षत्वतुकोरित्यत्र परग्रहणमधि

कंकृत्वापूर्वस्यपदांतस्योत्तरस्यपदादेरेकादेशस्यासिद्धत्वाव्यवस्थापनात् ॥ उ॰ अत्र पूर्वस्यपदादित्वेनपदां
२५ तत्वाभावादुत्तरस्यसोःपूर्वस्यपदत्वात्पदांतत्वेनपदादित्वाभावात्तदेकत्वाभावेनतुकाभवितव्यत्वादेकादेशस्यासिद्
25 त्वं ॥ अन्यथाकेवलपदांतपदयोरेकादेशस्यासिद्धत्वाश्रयणेहिप्रथमैकवचनसोःपूर्वस्यपदत्वात्तदेकादेशस्यासि
द्धत्वान्नुगभाववत्सप्तमीबहुवचनेइसुइतिस्यादौपूर्वपरत्वात्तदेकादेशस्यासिद्धत्वात्पत्वभावोष्यंगीकर्तस्यादिसुभ
यत्रषत्वंतुकोर्वहिरंगयोरंतरंगस्यैकादेशस्यवहिरंगपरिभाषयासिद्धत्वाल्लाभात् । उभयत्रतुविध्यर्थत्वेसूत्रेण
ज्ञानंतर्यपरिभाषाज्ञापकमेवनस्यात्तस्मात्स्यादितितुकाभवितव्यतान्नास्मन्मतेतुअसिद्धत्वारंभोविध्यर्थः किंतुज्ञा
पनार्थएवत्वन्मतेतुत्वयानाजानंतर्यपरिभाषार्थत्वेनकल्प्यमानस्यार्थस्यज्ञापकत्वाद्विध्यर्थत्वायोगाच्चतुकासि
द्धत्वारंभस्यवैयर्थ्यमेवस्यादिति ॥ ॥इतिचतुर्दशी॥ ॥वहिरंगशास्त्रप्रवर्तितमचमानंतर्येणनिमित्तत्वेनपासक शिवः
स्यचिदानंतर्येण — — — दंतरंगप्रवर्ततेतत्रकर्तव्यमेववहिरंगंनासिद्धमितिभावार्थः ॥ तुक्शास्त्रेचकृतिसप्तमीशेनह्रस्व २५
स्यानंतर्याश्रयणादधीत्येस्यादौतुकिवहिरंगस्यैकादेशस्यासिद्धत्वनिषेधस्य — — — तुकासिद्धत्वारंभस्योपपादकत्वा

न्त्रज्ञापकत्वविरोधः।नचात्रतुक्शास्त्रेबहिरंगशास्त्रप्रवर्तितस्याचः कृतानानंतर्याश्रयणंकिंतुकं कस्त्ववचतस्यानि
तरएवेतिवाच्यं।।वहिरंगशास्त्रप्रवर्त्तितस्यैवदीर्घस्यस्थानिवुध्याकृतानंतर्यमाश्रित्यतुक्शास्त्रप्रवृत्तेः अन्यथा
वहिरंगासिद्धत्वस्याभावे:तुकंतरंगकेकर्तव्येवहिरंगस्यासिद्धत्वमसिद्धेचवहिरंगस्यासिद्धत्वमसिद्धेचवहिरंगे
कस्वसद्भावात्तत्कृयात्तिरिस्योन्याश्रयप्रसंगात् नचतुकृचिकीर्षायामेवासिद्धत्वं।प्राप्त्यभावेच्चिकीर्षायान्त्वप्यनु
द्यात्।एवंषत्वतुकोरसिद्धइतिशास्त्रादपितुकसिद्धत्वाभावप्रसंगश्च।।एवंवहिरंगशास्त्रप्रवर्त्तिताजानंतर्यनिमि
त्तेंतरंगेवहिरंगंनासिद्धमितिपरिभाषार्थः।।स्थितःप्रोह्यतइत्यादौउपसर्गाद्ध्रस्वऊहतेरितिउपसर्गाद्ध्रूहतेरेवानंतर्या
श्रयणंनवहिरंगप्रवर्त्तितस्याचः अंवात्रकुमारीरमित्यादौ-अंबार्थनद्योरेवसंबुध्यानंतर्याश्रयणंनवहिरंगनिवृत्त
स्याचःइतिह्रस्वसिद्धत्वनिषेधाभावाद्ध्रस्वस्याभावइति।। ।।इतिपंचदशम्।।यद्यचोरानंतर्यमित्यनाश्रित्यवहिरंग
शास्त्रप्रवर्त्तिताजानंतर्यनिमित्तेंतरंगेवहिरंगासिद्धत्वनिषेधःपरिभाषार्थःकल्प्यते।।तद्ग्रामणिकुलंसेनानिकुल
मित्यत्रओत्तरपदेइकोह्रस्वोऽङ्योगालवस्येतिह्रस्वत्वेह्रस्वस्यपितिकृतितुगितितुक्प्रसंगः।।वहिरंगशास्त्रप्रव

र्निताज्ञानंतर्यमित्तेनुक्यंतरंगेवहिरंगस्यासिद्धत्वानिषेधात्।किंचवैयाकरणःसोवद्इतिवहिरंगस्ययणोसिद्धत्वाद्दायावो

२६ 20 भुवतः।अंतरंगयोरायावोर्वहिरंगन्नाखप्रवृत्ताज्ञानंतर्याश्रयणाभावेनवहिरंगस्ययणोसिद्धत्वनिषेधाभावएवोचि

तोसिद्धत्वनिषेधात्।नचग्रामणिकुलमित्यत्रपूर्वोत्तरपदसन्निपातलक्षणंह्रस्वत्वंतद्विघातकस्यतुकोनतिमित्तंतुकि

सतिपूर्वोत्तरपदयोरानंतर्यविघ्ना--इतिसान्निपातपरिभाषयैवतुङ्नि-वृत्तिरितिवाच्यं॥ह्रस्वस्यसत्सपितुग्विश्रवय

वावयस्य--समुदायावयवत्वात्तस्यपूर्वपदावयवत्वात्तस्यपूर्वपदावयवत्वेन्नाव्यवधानात्सन्निपातपरिभाष

यातन्निवर्तनानुपपत्तेः॥कथंचिदेतत्समर्थनेपिग्रामणिब्राह्मणकुलमित्यत्रनपुंसकंह्रस्वत्वेतस्यासिद्धत्वनिषेधा

त्राप्तस्यतुकःसन्निपातपरिभाषयानिष्टत्वसंभवादिति।इतिषोडशीकस्या॥वहिरंगशास्त्रनिरुत्तमचमानंतर्येण

निमित्तत्वेनाश्रित्यस्यदंतरंगंप्रवर्ततेत्रकर्ततितच्चकर्तव्येवहिरंगंनासिद्धमित्येवपरिभाषार्थः॥एवंचत्रयोदशाक

स्योक्तप्रकारेणाक्षघूस्योनःपचावेदमित्यादौसर्वेष्टसिद्धिः॥अधीत्येत्यादौवहिरंगनिरुत्तस्याचःकार्य्यत्वेनाश्रयणा २६

दसिद्धत्वनिषेधाभावानुकेकादेशस्यासिद्धत्वारंभवैयर्थ्यसमविशिष्यते॥तत्रैवंव्यवस्थापनीयं॥वाहठुद्धिधानेनांत

रंगेकर्त्तव्येवहिरंगस्यासिद्धत्वंज्ञापकंतात्रा कार्या।सिद्धत्वे विज्ञापमानेय चावेद मित्याद्यौ एतएत्वेकर्त्तव्येगुणलक्षणका
र्यस्यासिद्धत्वादेत्वाभावसिद्धावपिस्यान्नःस्योनेसत्रयणे गुणेणयोःप्रसंगेशास्त्रासिद्धत्वाभावेनपरत्वाद्वलीयसाशास्त्रे
णस्वकार्येगुणेप्रवर्त्तितेपश्चाद्यणिकर्त्तव्येगुणस्यासिद्धत्वेपिइकारगुणेननिर्वृत्तत्वाद्यणभावप्रसंगइतिशास्त्रासि
द्धत्वमंतरेणसर्वप्रयोजनानिर्वाहात्शास्त्रासिद्धत्वमेवाश्रयणीयं।शास्त्रासिद्धत्वेचाश्रीयमाणेयत्रांतरंगवहिरंग
योर्युगपत्प्रवृत्तिःस्यान्नाद्यौतत्रवहिरंगशास्त्रस्यासिद्धत्वात्स्वकार्यप्रवर्तनात् गुणादिसिद्धिःप्रथमप्रवृत्तवहिरंग
विषयेतुपश्चादंतरंगेकर्त्तव्येवहिरंगशास्त्रासिद्धत्वात्स्वकार्यप्रवर्तनार्थंवहिरंगशास्त्रप्रवर्त्तितादेशलक्षणकार्या
भावःप्रवर्तितादेशातप्रवर्तितादेशस्यासिद्धलक्षणकार्यप्रवृत्तिश्चेतिद्वय — — वहिरंगासिद्धत्वविधानाद्भवति॥त
थाचयथापचावेद मित्यादावादेशलक्षणकार्या — — एवमक्षद्यूरित्यादावपिअंतरंगेपणिकर्त्तव्येवहिरंगस्यो ढो
सिद्धत्वादादेशलक्षणका — — — ते:॥षत्वेकोसिचदित्याद्यौषत्वएकादेशस्यासिद्धत्वारंभोवहिरंगशास्त्रनिवृत्त —
चमानंतर्येणनिमित्तत्वेनाश्रिसपदंतरंगप्रवर्तितेतत्रकर्त्तव्येतद्वहिरंगनासिद्धमितिएतदर्थसज्ञापकत्वेनव्यवस्था

प्यते॥तथावैय्याकरणः सौवश्वइत्यत्र वहिरंगस्य यणोऽसिसिद्धत्वाद्यायावोः प्राप्तयोरनंथैवसखीयतेरप्रत्ययेसख्युःप
२७ सुरित्याद्यै वहिरंगस्यकाजकारलोपस्यासिद्धत्वाद्यणि चप्राप्ते यत्वासिद्धत्वारंभेण ज्ञापितार्थेनात्रवहिरंगासिद्धत्वनि
षेधात्सभावात्॥तुक्येकादेशस्यासिद्धत्वारंभः प्रथमप्रवृत्तवहिरंगासिद्धत्वेन स्थानिलक्षणकार्यंनभवतीत्येतस्यार्थस्य
27 ज्ञापकत्वेनाश्रीयते इतिनतुस्यसिद्धत्वारंभस्यापिमन्मते वैय्यर्थ्यमितिद्रष्टव्यं॥यत्तुभाष्ये अचः परस्मिन्नित्यत्रासिद्धंवहि
रंगलक्षणमंतरंगलक्षणइति असिद्धत्वात्परयणादेशस्य पूर्वयणादेशोभविष्यतीतिपद्यामध्येत्यत्रपूर्वयणादेशसम
र्थनंतत्रप्रथमप्रवृत्तवहिरंगस्यासिद्धत्वात्स्थानिलक्षणकार्यंविवक्षितंकिंतुपूर्वपरयणादेशयोर्युगपत्प्रसंगे परयणा
देशस्यासिद्धत्वात्पूर्वयणादेशःसमर्थितः॥अतएवतत्रनित्यादंतरंगस्यवलीयस्त्वसमर्थनं॥पूर्वंपरयणादेशप्रवृ
त्तौहितस्यासिद्धत्वात्पूर्वमणादेशोभविष्यतिइतिकिंनित्यादंतरंगस्यवलवत्वसमर्थनेन॥एवंचपद्यामध्येसेन्नदर्थंत शिवः
स्यभाष्यकारेणकृतंनित्यादंतरंगस्यवलवत्वसमर्थनंप्रथमप्रवृत्तवहिरंगासिद्धत्वेनस्थानिलक्षणकार्यंनभवतीति २७
अयमर्थोभाष्यकारस्यापिसंमतइत्येनदर्थस्यज्ञापकं अन्यथातत्र तस्यानुपयोगात्॥नचवैय्याकरणः सौविश्वइत्यत्रा

यावादेशयोः कर्तव्ययोर्यण्णादेशवदेचोऽपि वहिरंगत्वेनासिद्धत्वात्वादयः प्राप्तिः॥ सरव्युरिसावौ चांतरंगे यणि कृतऽनवकारलोप
स्या — — — वाघ्नवधानाद्गुणो अप्राप्तिरिति वहिरंगासिद्धत्वेन स्यानिलक्षणं कार्यं तु न भवतीति — — — नेनकिंचित्प्रयोज
नमस्तीति वाच्यं॥ एतस्य प्रयोजनोपन्यासस्य दिग्दर्शनमात्रत्वात्॥ न — — — विंव्याः फलं विंवं वदर्याः फलं वदरमित्यत्र विंव
वदरीशब्दाभ्यां अनुदात्तादेरञ्जितस्य फले लुक् लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुकि तस्य ह्ल्लुगुपधात्वेति स्थानिव
द्भावे निषेधेपि वहिर्भूततद्धितलुङ्निमित्तस्य स्त्रीप्रत्ययलुकोऽसिद्धत्वाद्यस्येति चेति लोपप्रसंगः सोऽस्माज्ज्ञापकान्न भव
ति॥ तथा आमलक्याः फलमामलकमित्यत्र नित्यं वृद्धशरादिभ्य इति मयटि फले लुकि स्त्रीप्रत्ययलुकि तस्यासिद्धत्वा
द्यस्येति चेति लोपप्रसंगो ऽस्माज्ज्ञापकान्न भवति॥ तथा पंचभिः षड्भिः क्रीतः पंचपटुरित्यत्र त्यादेः द्विर्वचनविधिं प्र
ति स्थान्यार्हादिति ठकि अध्यर्धेति लुकि स्त्रीप्रत्ययलुकि च तस्यासिद्धत्वाद्गुणप्रसंगः सोऽप्यस्माज्ज्ञापकान्न भवति॥
न च रध्यत्रे स्यादेः द्विर्वचनविधिं प्रति स्थानित्वनिषेधसामर्थ्याद्यणादेशस्य वहिरंगासिद्धत्वमपि न भवति॥ तथात्रापि
लुकि स्थानिवत्वनिषेधसामर्थ्यादेः असिद्धत्वस्यापि निरास इति वाच्यं वार्त्तिकप्रणयनस्योत्तरकालत्वेन तदपेक्षयासौ

त्रज्ञानानर्थकस्यवक्तुमशक्यत्वात्॥किंच अत्राष्टामत्राष्टेति सिज्लोपस्यबहिरंगासिद्धत्वात्पठोःकसीतिकत्वंप्राप्नोतिन
२८ चात्रकत्वसिज्लोपयोर्युगपत्प्राप्तौतत्कालप्रवृत्तयोरसिद्धंबहिरंगमंतरंगेपूर्वत्रासिद्धमित्यनयोःपरत्वबहिरंगासि
28 द्धत्वंबाधित्वापूर्वत्रासिद्धत्वप्रवृत्त्यासिज्लोपेकृतेसकृद्गतिन्यायाश्रयणेनतत्रनपुनर्बहिरंगासिद्धत्वप्रवृत्तिः॥अथवा
वसुषःपश्यपचिवुषःपश्यत्लुवुषःपश्येत्याद्यौअच्योपयणेवङादेशेषुकर्तव्येषुबहिरंगपरिभाषयाचवसुसंप्रसारण
स्यासिद्धत्वेकर्तव्येबहिरंगपरिभाषयावाहऊठिसत्रस्थापित — — — यत्वादसिद्धवदत्राभादित्याह्नोदीनांवसुसंप्रसा
रणस्यवासिद्धत्वेनसुपदंतरंगव। — — — शास्त्रद्वयसन्निधानाभावात्बहिरंगपरिभाषायाश्चप्रवृत्तिवदिहापिषढोः
कसीतिकत्वकर्तव्येसलोपइत्वीतितत्स्लोपेबहिरंगपरिभाषयासिद्धत्वेकर्तव्येबहिरंगपरिभाषयावाहऊठिसत्रस्थापित
त्वेनपूर्वकार्यत्वेपूर्वत्रासिद्धमितिकत्वसिज्लोपयोरसिद्धत्वेनयुगपदंतरंगबहिरंगयोःसन्निधानाभावान्निमित्ताभावेना शिवः
पिबहिरंगपरिभाषायाश्चप्रवृत्तिरितिवाच्यं॥सलोपइत्वीत्यादिसप्तमीनिर्देशानामसिद्धत्वेनतस्मिन्नितिनिर्दिष्टइति २८
परिभाषाणामप्रवृत्तिप्रसंगान्नियाअसिद्धकांडेसंज्ञापरिभाषस्यकार्यकालत्वव्यवस्थापनात्पूर्वपरव्यवस्थाभावेनवि

प्रतिषेधे परं कार्यमिति पूर्वत्रासिद्धत्वेन वहिरंगासिद्धत्वस्य वाधनाभावात्॥ वहिरंगपरिभाषायां चत्वसिज्लोपयोः प्र
र्वत्रासिद्धमित्यसिद्धत्वाभावेन तस्याप्रवृत्तिशंकाभावात्। किंच सनीस्रसोर्दनीध्वसइत्ता हौयडं· तास्य चाद्य चियडेनेचिचे
तिस्नुकियङ्लुको वहिरंगस्यासिद्धत्वादिति अदिति अनिदितां हल उपधायाः क्ङितीति नलोपस्यात्॥ सोप्यस्माज्ज्ञापकान्न
भवति॥ नियामकांतराभावे लक्ष्यानुरोधेन समाश्रयणीयात्सकृद्गतिन्यायाज्ज्ञापकवैयर्थ्यस्य वक्तुमशक्यत्वाच्च। प्रती
चः प्रतीचा अमुमुई चेत्यादौ भसंज्ञापेक्षत्वेन वहिरंगस्याचइत्यस्य लोपस्यासिद्धत्वादिको यणचीति यणादेशस्यैतज्ज्ञापकता
श्रयणे दुर्वारत्वाच्च। नच प्रतीचः पश्ये स्यादौ सुवुत्पतेः पूर्वमंतरंगत्वाद्यणादेशे कृते सुवुत्पत्त्यनंतरं अच इति तस्याकारस्य
लोपे सति यथैव अजंत पूर्वपदस्याच इति विधीयमानं दीर्घत्वं अनवकाशमिति सामर्थ्यादंतरंगमपि यणादेशं पूर्वं प्र
वर्तमानं वाधते तथा प्रतीचइत्यादाव च इति लोपानंतरमपि यदि तस्य वहि — — विनासिद्धत्वाद्यणादेशस्यातु नरपि चावि
ति विधानमनर्थकं स्यादिति सामर्थ्यादसि — — — — पि वाधिष्यत इति वाच्यं॥ अचपरिभाषाया — मदोपस्थान पक्षस्य
व्यवस्थापितत्वयानपुंसकह्रस्वह्रस्वत्सार्वधातुकनामि दीर्घादि घीदिषु यत्रांगप्रातिपादिकपूर्वपरादैरङ्गं तत्व संभवस्त

त्राचाप्रातिपदिकविशेषणेऽपियचाऽजंतत्वसंभवोनास्तितत्रविच्छिप्रच्छिशमादिदिवादिगणमिहहलितिदीर्घविधानेह्यिवइहा
२९ 29 पिचौपूर्वपदस्यांतरंगेणयणादेशेनावष्टब्धत्वादजंतत्वासंभवेनउत्तरपदाधिकारादाक्षिप्तेनपूर्वपदेनैवाचोविशे
षणीयतयापूर्वपदस्यत्वस्ययत्रवाचनास्थितस्याचोदीर्घविधानेनचावित्सस्यचरितार्थत्वात्-नचत्वत्तीयइत्रहलि
तिर्धनिरस्यर्थेमगस्यहलित्येतत्पर्यंतदूलोपेपूर्वस्यदीर्घोऽणइत्सतोवश्यानुवर्तनीयादणग्रहणादेवचावित्सत्रा
पिस्थानिनिर्दिशल्लाभेनाच्परिभाषानुपस्थानात्तस्मिन्नितिनिर्दिष्टग्रहणस्यानंतर्यार्थत्वाच्चोसमनंतरंपूर्वस्याणो
दीर्घविधानसामर्थ्यात्तद्विधानात्पूर्वमंतरंगोयणादेशस्तदनंतरंवहिरंगासिद्धंचवाधिष्यतइतिवाच्यं॥हलइति
सूत्रेभाष्यएवद्वितीयतृतीयतुर्येतिनियातनादेवतत्रदीर्घत्वाभावसमर्थनेनाप्युवोभयोऽन्निरत्तमित्यणग्रहण
स्यकःकाशाइतिइग्ग्रहणस्यचनिवृत्तिपक्षसमाश्रयणेनचकतरिंभवतीत्तिकर्त्रेधःपर्यसेवानयोऽपिवादित्तिदी शिवः
र्घत्वेभाष्यकाराभ्युपगमेप्रतीतेश्चाग्निसत्रापिश्रच्परिभाषोपस्थानावश्यंभावात्॥अणग्रहणानुवृत्तिश्शेष २९
णश्रिसाच्परिभाषानुपस्थानकल्पनोऽपिचावित्सत्रोत्तरपदाधिकाराक्षिप्तपूर्वपदसन्निधातावश्यंभाचेनाणग्र

ह्रस्य च विशेषणविशेष्यभावे कामचारणांतरंगे यणादेशेनावष्टब्धविषयतया चावर्णांत पूर्वपदासंभवेन यणादेशा
विषये प्राचो वा चइत्याद्यावंतरंग — — — वृत्तेन सवर्णदीर्घत्वेन कृतकार्यतया गौरवमात्रफलस्या चइत्यस्य लोपस्या चा
विति — — — स्य चानपेक्षणात् प्रथमप्रवृत्ते सवर्णदीर्घत्वे ऽत्र ह्रस्वो यो न इत्यत्र तत्परकरणेन — इ — लोपस्य । तत्रप्रा
प्त्यभावात् च यथासंभवं पूर्वपदेनैवाणग्रहणस्य विशेषणीयतया — र्वदेव चावित्यस्यानर्थक्यापायोगात् अत्राण
ग्रहणमनुवर्तयतो मतेपि प्रतीचः पश्यो साधुत्वरीत्या चोदीर्घविधानानर्थक्यकल्पनया सामर्थ्याद्यणादेशनिव
र्तनेपि कर्तृचः पश्येत्यादि दीर्घनारंभविषये यणादेशनिवर्तनायोगेनानिष्टरूपप्रसंगात् ॥ न च कानि संतिकौस्त
इत्यत्रैव परांतविधिं प्रति निरस्तानिवद्भिति स्यावत्वनिषेधसामर्थ्याद्देवप्रतीचइत्यादावसिद्धत्वमपि बाधिष्यत इ
ति वाच्यं ॥ दिवमाचष्टे प्रहस्तैका चृदिवयतिदि वयते रप्रत्ययो विचद्वोः शुभ्यामित्यादौ परांतविधिं प्रतिनरस्तानिव
दित्यस्य चारितार्थ्येन सामर्थ्येनाविधानात् ॥ तत्र हि परमवाक् परमवाचौ इत्यादौ रूपासिद्धये नलुमतांगस्येत्यत्र
भाष्यकारेण स्वादिष्वसर्वनामस्थानयचिभमित्यत्र योगविभागाश्रयणेन सावपि पूर्वपदत्वाश्रयणात् दिवश्रौ

दिसौ त्वस्य दि। वउदिसुत्वस्य णिलोपस्य स्थानिवद्भावादप्राप्तस्य प्रवृत्तये यदंतविधिं प्रतिनस्थानिवदिति स्थानिव
३० त्वनिषेधस्यापेक्षणात्॥ अयं च परिभाषाया अक्षरार्थः प्रकल्प्यते कार्यमनतिप्रकृतिरंतर्निमित्तं वहिष्ठप्रकृतिर्यस्य
30 सद्वहिष्ठप्रकृतिर्वहिरंगइत्यर्थः॥ अत्र चानंतर्यमप्यवधानं यस्मिन्नंतरंगे पंचमीनिर्देशेन सप्तमीनिर्देशेन वाश्रीय
ते तत्रैव तस्मिन्निति निर्दिष्ट इति निर्दिष्टग्रहणज्ञानंतर्येण निमित्तत्वेनाश्रयणात्॥ तदनंतरंगमज्ञानंतर्यं तच्चार्थो
त् अव्यवहितं पूर्वत्वेन परत्वेन वानिमित्तत्वेनाश्रित्य प्रवर्तते मानेन तु कार्यत्वेन — ह्यासौ प्रत्यासत्या वहिरंगकृतं आ
श्रीयते॥ तथा चायमर्थः संपन्नः वहिरंगशास्त्र — — सचं निमित्तमाश्रित्यांतरंगे कर्तव्ये वहिरंगं नासिद्धमिति तत्तश्च
ग्रामणिकुलमित्यो — — वहिरंगनिर्वृत्तस्याचः कार्यत्वेनाश्रयणात्तत्रासिद्धत्वनिषेधाभावः॥ वहिरंगशास्त्रं निव
र्त्यांतरंगे निमित्तत्वेनाश्रयणादेवांतरंगे अज्ञानंतर्याश्रयणे वहिरंगासिद्धत्वनिषेध इत्युच्यते॥ पंचमीनिर्देशेन शिवः
च पूर्वत्वेन परत्वेन वानिमित्तत्वेनाश्रयणे हि निर्दिष्टग्रहणेनानंतर्याश्रयणात्॥ तदेवं प्रसक्तेन ज्ञापकभूमिविरो ३०
धः क्वचिदतिप्रसंगो वा त्वत्पक्षे तु ज्ञापकभूम्यनुरोधेपि वहवो दोषा इत्यन्नुक्ष्णः शरडि स्यत्र षत्वतुको रित्यत्र चकृतं

परिभाषार्थविवरणं तदुभयमपि कथंचिदुपपादयितुमशक्यत्वाच्चिंत्यं ॥ पचावेदमित्यादौ वहिरंगासिद्धत्वनिषेधप्रसंगा
त् ॥ न च तत्रापि पक्षे यत्रांतरंगेण वाचोऽणानंतर्यमाश्रीयते तत्र वहिरंगशास्त्रं निर्वर्तमचं निमित्तमाश्रित्यांतरंगे कर्तव्ये
वहिरंगमसिद्धमिति परिभाषार्थकल्पनात् ॥ स्योनः स्योने स्यत्रयणगुणयोः समकालप्रवृत्तौ च न दोषः ॥ पचावेदमि
त्यादौ वहिरंगनिर्वृत्तस्याचोऽभिभिन्नत्वेनाश्रयणात् ॥ एवमस्य घ्रूरित्यत्र च तस्य निमित्तत्वेनाश्रयणात् न दोषः ॥ ज्ञापक
भूम्यनुरोधश्चास्तीति सोपि पक्ष उपपादयितुं शक्यत इति वाच्यं ॥ वहिरंगकृतानानंतर्याश्रयणेऽन्तरंगे वहिरंगमसि
द्धमिति मदुक्तार्थस्य तत्पक्षेप्युक्तमशक्यत्वात् ॥ तत्संग्रहणे च तेनैवोपपत्तावतिरिक्तवैयर्थ्यात् ॥ एवं सति न धातुलो
प इति सूत्रे उपेद्धः प्रेद्ध इत्यत्र गुणतन्निषेधयोः समकालप्रवृत्तावपि नानानंतर्यमिति वहिरंगासिद्धत्वनिषेधेन न धा
तुलोप इत्यत्रार्धधातुकग्रहणस्य लोपविशेषणत्वपक्षे गुणनिषेधप्रसंजनं हरदत्तेन कृतं चानुपपन्नं ॥ अंतरंगवहि
रंगयोः क्वचिदानानंतर्याश्रयणमात्रेण समकालप्रवृत्तयोरसिद्धत्वनिषेधांगीकारे स्योनः स्योना इत्यस्य इदमित्यादिषु च
रुषु दोषप्रसंगात् ॥ यच्चाचः परस्मिन्पूर्वविधानस्य तत्र हरदत्तेनोक्तं अनादिष्टादचः पूर्वत्वविधानाभावेपि वैयाकर

३१

31



